No. २३९ / घ

Title कुवलयानन्दः

Author अप्पय्य दीक्षितः

Extent २८ पत्र Age

Subject अलङ्कारशास्त्र

ऊर्ध्वलयानन्दः

~~२३६~~

२३५

१२ पत्राणि

नं. 2319 ख
कुवलयानन्दः
[illegible]

॥ కువలయానందాభిధేయం ॥
గ్రంథః

कुवलयानंद पत्रा· 3
२.० लंबर ३३९

॥श्रीमतेरामानुजायनमः॥ अमरीकवरीभारभ्रमरीमुखरीकृतं दूरीकरोतुदुरितंगौरीचरणपंकजं १ परस्परतपःसंपत्फलायितपरस्परौ प्रपंच
मातापितरौप्रांचौजायापतीस्तुमः २ उद्घाट्ययोगकलयाहृदयाब्जकोशंधन्यैश्चिरादपियथारुचिगृह्यमाणः यःप्रस्फुरत्यविरतंपरिपूर्णरूपःश्रे
यःसमेदिशतुशाश्वतिकंमुकुंदः ३ अलंकारेषुबालानामवगाहनसिद्धये ललितःक्रियतेतेषांलक्ष्यलक्षणसंग्रहः ४ येषांचंद्रालोकेदृ
श्यंतेलक्ष्यलक्षणश्लोकाः प्रायस्तएवतेषामितरेषांत्वभिनवाविरच्यंते ५ उपमायत्रसादृश्यलक्ष्मीरुल्लसतिद्वयोः हंसीवकृष्णतेकीर्तिःस्वर्गं
गामवगाहते ६ यत्रोपमानोपमेययोःसहृदयहृदयाह्लादकत्वेनचारुसादृश्यमुद्भूततयोल्लसतिव्यंग्यमर्यादांविनास्फुटंप्रकाशतेतत्रोपमा
लंकारः हंसीवेत्युदाहरणं इयंचपूर्णोपमेत्युच्यते हंसीकीर्तिःस्वर्गंगावगाहनमिवशब्दश्चेत्येतेषामुपमानोपमेयधर्मोपमावाचकानांचतुर्णाम
मुपादानात् यथावा गुणदोषौबुधोगृह्णन्निंदुक्ष्वेडाविवेश्वरः शिरसाश्लाघतेपूर्वंपरंकंठेनियच्छति अत्रयद्यप्युपमानोपमेययोर्नैकःसाध
रणोधर्मः उपमानेईश्वरेचंद्रगरलयोर्ग्रहणमुपादानंतयोर्मध्येपूर्वस्यचंद्रस्यशिरसाश्लाघनंवहनमुत्तरस्यगरलस्यकंठेनियमनंस्थापनमुप
मेयेबुधेगुणदोषयोर्ग्रहणंज्ञानंतयोर्मध्येपूर्वस्यगुणस्यशिरसाश्लाघनंशिरःकंपनेनाभिनंदनमुत्तरस्यदोषस्यकंठेनियमनंकंठादुपरिवाच
ानुद्घाटनमितिभेदात् तथा पिचंद्रगरलयोर्गुणदोषयोश्चबिंबप्रतिबिंबभावेनाभेदाउपादानज्ञानादीनांगृह्णन्नित्यादौकृशाब्दोपादानेनाभेदा
ध्यवसायाच्चसाधारणधर्मैनेतिपूर्वस्मादिहविशेषः वस्तुतोभिन्नयोरप्युपमानोपमेयधर्मयोःपरस्परसादृश्यादभिन्नयोःपृथगुपादानंबिंबप्रति श्रीरामचंद्रजी॥
बिंबभावइत्यालंकारिकसमयः वर्ण्योपमानधर्माणामुपमावाचकस्यच एकद्वित्र्यनुपादानैर्भिन्नालुप्तोपमाष्टधा तडिद्गौरींदुतुल्यास्या १

कर्पूरंतीरक्ष्णोर्मम कांता स्मरवधूयंतीनत्वीहशारहोमया यत्नयामेलनंतत्र लाभोमेयश्चतदैतेः तदेतत्काकतालीयमवितर्कितसंभवं उपमेयादी।
नांचतत्तांमिमथोएकस्यद्वयोस्त्रयाणांवा प्रतिपादकशब्दाभावेन लुप्तोपमेत्युच्यते साचाष्टधा यथावाचकलुप्ता धर्मलुप्ता धर्मवाचकलुप्ता वाचकोप
मेयलुप्ता उपमानलुप्ता वाचकोपमानलुप्ता धर्मोपमानलुप्ता धर्मोपमानवाचकलुप्ताचेति तत्रोपमानलोपरहितास्चत्वारोभेदास्तड़िगौरीत्या।
दिश्लोकेनप्रदर्शिताः तदंतोभेदाउत्तरश्लोकेन तत्रतड़िगौरीत्यत्रवाचकलोपः तडिदिवगौरीत्यर्थेउपमानानिसामान्यवचनैरितिसमासविधायक
शास्त्रकृतः इंदुतुल्यास्येत्यत्रधर्मलोपस्तैत्तिकः नशास्त्रकृतः कांत्यादइंदुतुल्यास्येत्यपिवक्तुंशक्यत्वात् कर्पूरंतीत्यत्रधर्मवाचकलोपः कर्पूरमिवाचरं
तीत्यर्थेविहितस्यकर्पूरवदानंदात्मकाचारार्थस्यक्विपइवशब्देनसहलोपात् अत्रैलोपऐच्छिकः नयनयोरानंदात्मकतयाकर्पूरंतीतितदुपादानस्य धर्म ६
पिसंभवादिति कांतास्मरवधूयंतीत्यत्रवाचकोपमेयलोपः अत्रकांतेतिविशेषणसामर्थ्यात्स्वात्मानंकामवधूमिवाचरंतीत्यस्यार्थस्यगम्यमानत
यास्वात्मानउपमेयस्यसहोपमावाचकेनानुपादानात्सत्तैत्तिकः स्वात्मानंस्मरवधूयंतीत्युपमेयोपादानस्यापिसंभवात् काकतालीयमित्यत्रक
ाकतालशब्दौवृत्तिविषयेकाकतालसमवेतक्रियावर्तिनौतेनकाकागमनमिवतालपतनमिवकाकतालमितीवार्थेसमासाउतद्विषयादितितापकात्स
मासः उभयत्रोपमेयंस्वस्यघटितमनंतत्वेवरहसितन्यायावस्थानंचतेनस्वस्यतन्याश्चसमागमः काकतालसमागमसदृशइतिफलति ततःकाकतालमिवका
कतालीयमितिद्वितीयस्मिन्निवार्थेसमासात्तद्विषयादितिसूत्रेणइवेप्रतिकृताविसधिकारस्थेनछप्रत्ययः तथाचपतनदलितंतालफलंयथाकाकेनोपभु
क्तमेवंरहोदर्शनत्वमितदृयातन्वीस्वेनोपभुक्तेतिनदर्थः तत्रस्थात्रकाकागमनतालपतनसमागमरूपस्यकाकतृततालफलोपभोगरूपस्यचोपमानस्यानु।

कुवलयानंदः
२

पादानात्स्वसयार्थोपमायामुपमानलोपः समासार्थोपमायां वाचकोपमानलोपः सर्वोप्ययं लोपस्तु प्रत्ययविधायकशास्त्रकृतः अवितर्कितसंभवमिति साधार
णधर्मस्यानुपादाने प्रत्ययार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवाचकलोपः इति सूक्ष्मदृशावधानेनं एतेषामुदाहरणांतराणि स्वैरनयात्र वि०
लिख्यंते उपमानोपमेयत्वे यदेकस्यैव वस्तुनः इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः एकस्यैव वस्तुन उपमानोपमेयत्ववर्णनमनन्वयः वर्ण्यमानमपि स्व
स्य स्वेन साधर्म्यं नान्वेतीति व्युत्पत्तेः अनन्वयिनो पदार्थस्याभिधानं सदृशांतरव्यवच्छेदेनानुपमत्वद्योतनाय इंदुरिंदुरिव श्रीमानित्युक्ते श्रीमत्त्वे चंद्रस्य नान्यः सदृ
शोस्तीति सदृशांतरव्यवच्छेदो लभ्यते न तथ्यस्यैवापि सादृश्यासंभवादनुपमत्वपर्यवसानं यथावा गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं
रामरावणयोरिव पूर्वोदाहरणे श्रीमत्त्वसाधर्म्यस्योपादानमस्ति इह तु गगनादिषु वैपुल्यादिकधर्मस्योपादानं नास्तीति विशेषः पर्यायेण द्वयोस्तदुपमेयोप
मानता धर्मार्थयोरिव पूर्णश्रीरर्थो धर्म इव त्वयि द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनं तृतीयसादृश्यव्यवच्छेदार्थं धर्मार्थयोर्हि कस्यचित्केनचित्सादृश्ये वर्
णिते तस्याप्यनेन सादृश्यमर्थसिद्धमपि पुनस्तो वर्ण्यमानं तृतीयसादृश्यव्यवच्छेदं फलति यथावा खमिव जलं जलमिव खं हंस इव चंद्रश्चंद्र इव हंसः कुमुदाका
रास्तारास्ताराकाराणि कुमुदानि पूर्वत्र पूर्णश्रीरिति धर्म उपात्त इह तु निर्मलत्वादिधर्मो नोपात्त इति भेदः उदाहरणद्वयेपि प्रकृतयोरेवोपमानोपमेयत्वकल्पनं (
राज्ञि धर्मार्थसंप्रहृष्टे शरदि गगनसलिलनैर्मल्यस्य च वर्णनीयत्वात् प्रकृताप्रकृतयोरप्येवासं भवति यथावा गिरिरिव गजराजोयं गजराज इवोच्चकैर्विभाति
गिरिः निर्झर इव मदधारा मदधारेवास्य निर्झरः स्रवति प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं तल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः प्रसिद्धोपमानोपमेय श्रीरामचंद्रजी
भावप्रातिलोम्यात्प्रतीपं यथावा यत्त्वन्नेत्रसमानकांति सलिले मग्नं तदिंदीवरं मेघैरंतरितः प्रिये तव मुखच्छायानुकारी शशी येपि त्वद्गमनानुसारिगतय २

लिराजहंसा गतास्त्वत्साहचर्यविनोदमात्रमपि मे दैवेन न क्षम्यते अत्रोपमेयलाभेन वर्ण्यस्यानादरस्थितत् अलं गर्वेण ते वक्त्र कान्त्या चंद्रोपि तादृशः अस्तुत्कृष्टगु
णतया वर्ण्यमानस्यान्यत्रस्वसादृश्यमसहमानस्योपमेयं किंचित्प्रदर्श्य तावता तस्य तिरस्कारो द्वितीयं प्रतीपं एवं यस्मादपि विच्छित्तिविशेषशालि यथा वा गर्वमसं
भाव्यमिमं लोचनयुगलेन किं वहसि भद्रे सन्तीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि वर्ण्योपमेयलाभेन तथान्यस्यापि नादरः कः क्रौर्यदर्पस्ते मृ
त्यो त्वत्तुल्याः संति हि स्त्रियः अस्तुत्कृष्टगुणतया कश्चिदनुपमानत्वमसहमानस्यावर्ण्यस्य वर्ण्यमुपमेयं परिकल्प्य तावता तस्य तिरस्कारः एवं प्रती
पवैपरीत्येन तृतीयं प्रतीपं यथा वा अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः ननु सन्ति भवादृशानि भूयो भुवनेस्मिन्वचनानि दुर्जनानाम्
वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत् मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबुजं अवर्ण्येन वर्ण्योपमित्यनिष्पत्तिवचनं पूर्वं उत्कर्षशालि च तुर्यं प्रती
पं उदाहरणे मुधापवादत्वोक्त्योपमित्यनिष्पत्तिरुद्घाटिता यथा वा आकर्णय सरोजाक्षि वचनीयमिदं भुवि शशांकस्तव वक्त्रेण पामरैरुपमीयते प्रतीपमुपमा
नस्य कैमर्थ्यमपि मन्यते दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिंदुना उपमेयस्यैवोपमानप्रयोजननिर्वहणक्षमत्वेनोपमानकैमर्थ्यमुपमानघातिलोमासं पञ्चमं प्रतीपं
यथा वा तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि केचिदनन्वयोपमेयोपमा
प्रतीपानामुपमाविशेषत्वेन तदंतर्भावं मन्यंते अन्ये तु पञ्चमं प्रतीपप्रकारमुपमानाक्षेपरूपत्वादाक्षेपालंकारमाहुः विषय्यभेदताद्रूप्यरंजनं विषयस्य यत्
रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् अयमास्ते विना शंभुस्तार्तीयीकं विलोचनं शंभुर्विश्वमवत्यद्य स्वीकृत्य सम
दृष्टितां अस्यां मुखेंदुना लब्धे नेत्रानंदे किमिंदुना साध्वीयमपरा लक्ष्मीरसुधा सागरोत्थिता अयं कलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते विषय्युपमानभूतं पद्मा

शिविषयस्तूपमेयं वर्णनीयं मुखादि विषयिणोऽभेदेन ताद्रूप्येण च विषयरंजनं रूपकं अन्यरूपेण रूपवतः करणात् तच्च क्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्व
चिद्भेदे प्रतीयमान एव तदीयधर्मारोपमात्रपर्यवसितं ततश्च रूपकं तावद्द्विविधं अभेदरूपकं ताद्रूप्यरूपकमिति द्विविधमपि प्रत्येकं त्रिविधं प्रसिद्धविषय्याधि
क्यवर्णनेन तन्न्यूनत्ववर्णनेनानुभयोक्त्या च एवं रूपकं षड्विधं अयं हीत्यादिसार्द्धश्लोकेनाभेदरूपकाणि अस्यामुखेंदुनेत्यादिसार्द्धश्लोकेन ताद्
रूप्यरूपकाणि साधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानि येन दग्धा इति विशेषणेन वर्णनीये राज्ञि प्रसिद्धशिवाभेदानुरंजनाच्छिवस्य पूर्वावस्था
तो वर्णनीयराजभावावस्थायां न्यूनत्वाधिकत्वयोरवर्णनाच्चानुभयाभेदरूपकमाद्यं तृतीयलोचनप्रहाणोक्त्या पूर्वावस्थातो न्यूनतादर्शनान्न्यूनाभेदरूपकं द्वि
तीयं न्यूनत्ववर्णनमप्यभेददार्ढ्यापादकत्वाच्चमत्कारकारि विषमदृष्टिपरित्यागेन जगद्रक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायामुत्कर्ष
विभावनादधिकाभेदरूपकं तृतीयं एवमुत्तरत्र ताद्रूप्यरूपकोदाहरणेष्वपि क्रमेणानुभयन्यूनाधिकभावा उन्नेयाः अनेनैव क्रमेणोदाहरणान्तराणि चंद्रज्योत्स्नावि
शदपुलिने सैकतेऽस्मिन्सरय्वा वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् एको वक्ति प्रथमनिहतं कैटभं कंसमन्यस्त्वं तत्त्वं कथय भगवन्को हतस्तत्र पूर्वं अत्र स
त्वमिसनेन कंसकैटभयोर्हंतारुभजंत्तमारान्म्य वर्णनीयस्य राज्ञः प्रतिपाद्यते प्रति कंसकैटभवधयोः पौर्वापर्यप्रश्नव्याजेन तत्तादात्म्यदृढीकरणात्पूर्वाव
स्थात उत्कर्षापकर्षयोरविभावनाच्चानुभयाभेदरूपकं वेधा द्वेधा भ्रमं चक्रे कांतासु कनकेषु च तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः अत्र साक्षादिति विशेष
णेन विरक्तस्य प्रसिद्धशिवतादात्म्यमुपदिश्य नराकृतिरिति द्विमूर्तिवैकल्यप्रतिपादनान्न्यूनाभेदरूपकं त्वय्यागते किमिति वेपत एष सिंधुस्त्वं सेतुमंथकृदतः कि
मसौ विभेति द्वीपांतरेऽपि न हि ते समवशंवदीय त्वां राजपुंगव निषेवत एव लक्ष्मीः अत्र त्वं सेतुमंथकृदिति सेतोरप्यन्तमंथनस्य च कर्त्तृत्वात्पुरुषोत्तमेन वर्णनीयस्य तादा

वा

न्यस्तुत्का न त्वापि त्वदागमनं सेतुबंधनाय मंथनाय वेति समुद्रेण नन्वे तच्चंद्रीयं तत्राणामपि तद्दृशं वदत्वेन एवं वत्नेनत्वामानावास्यामलत्वमीकत्वेन मंथ
न प्रसक्तमौखेति एवं च स्यात्तदुत्कर्षविभावनादधिकाभेदरूपकं किं पद्मस्य रुचिं न हंति नयनानंदं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किं
वक्त्रेंदौ तव सत्ययं यदपरः शीतांशुरुज्जृंभते दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिंबाधरे अत्रापरः शीतांशुरिति अनेन वक्त्रेंदोः प्रसिद्धचंद्राद्भेदमाविःकृत्य स
प्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेनोत्कर्षापकर्षयोरदर्शनात्तुल्यतया ताद्रूप्यरूपकम् अयं तु वदनो ब्रह्मा द्विबाहुरपरो हरिः अभाललोचनः शंभुर्भ
गवान्बादरायणः अत्र हरावपर इति विशेषणाद्विशेषिताद्रूप्यमात्रविवक्षा विभाति ताच चतुर्वदनत्वादिवैकल्यं चोक्तमिति न्यूनताद्रूप्यरूपकमिदं विशेषोक्तेरुदा
हरणमिति वामनमतं यदाह एकगुणहानौ अन्यगुणसाम्यदार्ढ्यं विशेषोक्तिरिति किमस्तु निःक्षेपिते जगत्तु मनसे मयि निमज्जति नीमसतामनः प्रम
किलक्ष्मीतिमाह नदर्थिकां न लघुत्वेऽपरो विबुधः स्मरः अत्र दमयंतीकृतचंद्रोपालंभे प्रसिद्धत्वेनेन निर्याणकालिकमनःप्रवेशाख्यातितासम्यक् विषयः
किं तु न लघुत्वं च उएवेति न तोस्याधिक्यप्रतिपादनादधिकताद्रूप्यरूपकं रूपकस्य सावयवनिरवयवत्वादिभेदप्रपंचनं तु चित्रमीमांसायां द्रष्टव्यं परिणाम
क्रियार्थोपयोगे विषयी विषयात्मना प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा यत्रारोप्यमाणो विषयी किंचित्कार्योपयोगित्वेन निबध्यमानः प्रकृतस्य तदुपयो
गित्वासंभवात्प्रकृतात्मतापत्तिमपेक्षते स परिणामालंकारः तत्रोदाहरणं प्रसन्नेनेति अत्र हि अब्जस्य वीक्षणोपयोगित्वं निबध्यते दृशः मयूरव्यंस
कादिसमासेनोत्तरपदप्राधान्यात् न चोपमितसमासाश्रयणेन दृगब्जमिवेति पूर्वपदार्थप्राधान्यमस्तीति वाच्यं प्रसन्नेनेति सामान्यधर्मप्रयोगादुपमितं
व्याघ्रादिभिः सामान्याप्रयोग इति तत्प्रयोग एवोपमितसमासानुशासनात् तस्य वीक्षणोपयोगित्वं न स्वात्मना संभवतीति तत्तस्य प्रकृतदृगात्मना परिण

उह्यते

अयोगव्यवच्छेदः

प्राणनिर्गमकालीन मनः
प्रवेशार्थो यस्याः सा तां श्रुति
न लघुत्वेऽपराम् मनःप्र
वेशाधिकरणत्वेन लघु
त्वेनास्यैवतीत्माहेति ६

नियुक्त लाति
भुजं तेण १
दर्या १

उपकारस्तवयोरस्तवान् १

सपेत्तणत्परिणामालंकारः यथावा तीर्त्वा भूतेशमौलिस्वजममरधुनीमात्मनासौतृतीयस्तस्मैसौमित्रिमैत्रीमयमुपकृतवानातरंनाविकाय यामयाम्य
त्तनीभिः शबरयुवतिभिः कौतुकोदंचदक्षं कृच्छ्रादन्वीयमानः क्षणमचलमथोचित्रकूटस्यतस्थे अत्रारोप्यमाणआतरः सौमित्रिमैत्रीरूपतापत्रागुहोप
कारलक्षणकार्योपयोगिनस्वात्मनागुहरूपरघुनाथैकशासाहापेक्षितेनवेतनार्थितामावादितिपरिणामः एवंसमासोदाहरणमिहत्वसमासोदाहरण
मिति वक्रनिर्वक्रनोल्लेखादेकस्योल्लेखइष्यते स्त्रीभिःकामोर्थिभिःस्वर्द्रुः कालःशत्रुभिरेक्षितः यत्रनानाविधधर्मयोगेपकंवस्तुतत्तद्धर्मयोगरूपनिमि
त्तभेदान्नेकेनग्रहीत्रानेकधोल्लिख्यतेतत्रोल्लेखः अनेकधोल्लेखनेरुच्यर्थित्वमयादिकंयथार्हंप्रयोजकं रुचिरभिरतिः अर्थित्वंलिप्सा भयंभीतिः स्त्री
भिरित्याघुदाहरणं अत्रएकएवराजासौंदर्यवितरणपराक्रमशालीतिस्त्रीभिरर्थिभिःप्रत्यर्थिभिश्च[redacted]रुच्यर्थित्वभयैः कामकल्पतरुकालरूपोह
ष्टः यथावा गजत्रातेतिसुहृद्भिः प्रीकांतरतियोवतैः यथास्थितश्चबालानिर्दिष्टःशौरिःसकौतुकं यस्तथामीतंभवंतंगजंत्वरयात्रायतेस्मसोयमादिपुरुषोन
भरुतिहृद्भिःसंसारभीतानद्भयार्थिनीभिःरूपमोयंमधुरोरूपंशविश्रद्दष्टः यल्लथाचंचलत्वेनप्रसिद्धायाःश्रियोपिकामोपचारेवेदग्धेननिसवह्नन सोयंरि
सयुवेतियुवतिसमूहैः सोलंकैरिष्टः बालानिरूपबाल्यगतरूपवेषालंकारदर्शनमात्रलालसानिर्यथास्थितवेषादिपुरुषोदृष्टइतिवक्रधोल्लेखः एवंकाम
त्वाद्यारोपरूपकसंकीर्णः अयंतत्प्रदृष्टइतिभेदः एकेनवक्रधोल्लेखेप्यसोविषयभेदतः गुरुर्वचस्यर्जुनोयंकीर्तौभीष्मःशरासने ग्रहीतृभेदाभावेपिविषयभे
दादक्रधोल्लेखनादस्यावुल्लेखः उदाहरणंस्पष्टमसंकीर्णमन्योविषयेमहानयमितिवतदहस्यातिरिक्ताद्यर्थांतरस्यापिकोडीकरणात् प्रभेदोयथा अरुणांजयोः
रुद्रांविलग्नेविपुलंचरणेविपिविस्तृतंनितंबे अधरेरुणमाविरस्तुचित्तेकरुणाशालिकपालिभागधेयं सात्स्मतिचांतिसंदेहेस्तंदंकालंहृतिचयं पंकजंपद्मपतःकं

स्मृतिभ्रांतिसंदेहैः वदतंयतयाहेतुतोसदकं तेवामकल्पकं
ःसेदंकोविशतःस्मिन्‌ताभात २

तामुखंमेगाहतेमनः अयंश्रमनमधपत्वन्मुखंवेत्तिपंकजं पंकजंवाम्बुधांम्बुवैमसाकंत्वननिर्णयं स्मृतिर्भ्रांतिसंदेहैः सादृश्यान्निबध्यमानैः स्मृतिमान्।
भ्रांतिमान्ससंदेहइतिसमस्तादिपदांकितमलंकारत्रयंभवतितत्रक्रमेणोदाहृतं यथावा दिग्वानामपिकृतविस्मयांपुरस्तादंभस्तः स्फुरदरविंदचारुहस्तां
उदीक्ष्यश्रियमिवकांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्यशौरिः एवंचस्मृतिमदुदाहरणेसदृशस्येवस्मृतिः अत्रसदृशालक्ष्मीस्मृतिरेवंकेतत्संबंधिनो
जलनिधिमंथनस्यापिस्मृतिरितिभेदः पलाशकुसुमभ्रांत्याशुकतुंडेपतत्यलिः सोपिजंबूफलभ्रांत्यातमलिंधर्तुमिच्छति अत्रायोगभ्रांतिविषयकभ्रांति
निबंधनः पूर्वस्माद्विशेषः जीवनग्रहणेनम्राःगृहीत्वापुनरुत्थिताः किंकनिष्ठाःकिमुज्येष्ठाघटीयंत्रस्यदुर्जनाः एवोदाहृतसंदेहः प्रसिद्धकोटिकः अयंतु
प्रसिद्धकोटिकइतिभेदः प्रकृतापह्नुतिरमस्यारोपार्थोधर्मनिह्नवः नायंसुधांशुः किंतर्हिव्योमगंगासरोरुहं वर्णनीयेवस्तुनितत्सदृशधर्मारोपफलकः।
लदीयधर्मनिह्नवः कविमतिविकासोस्तितधर्मांतरस्यापिनिह्नवः शुद्धापह्नुतिः यथाचंद्रेयुनदीयुगरीकत्वारोपफलकस्तदीयधर्मस्यचंद्रत्वस्यापह्नु
वः यथावा अंकंकेपिशशंकिरेजलनिधेःपंकंपरेमेनिरेसारंगंकतिचिच्चसंजगदिरेभूच्छायमैच्छन्परे इंदौयद्दलितेंद्रनीलशकलश्यामंदरीदृश्यतेतन्
सांद्रंनिशिपीतमंधतमसंकुक्षिस्थमाचक्ष्महे अत्रोस्तितधर्मोणामप्यपह्नवः परपक्षत्वोपन्यासादर्थसिद्धः सएवयुक्तिपूर्वश्चेद्धेत्वपह्नुतिः नेंदुस्ती
व्रोनतिग्मांशुर्कः सिंधोरौर्वायमुत्थितः अत्रचंद्रएवतीव्रत्वनैशिकत्वयुक्तिभ्यांचंद्रत्वसूर्यत्वापह्नवोवडवानलत्वारोपार्थः यथावा मंथानभूमिधरमूलशि
लासहस्रसंघट्टनव्रणकिणःस्फुरतीन्दुमध्ये छायामृगःशशकइत्यपिपामरोक्तिस्तेषांकथंचिदपितत्रनसंप्रसक्तिः अत्रचंद्रमध्येमंथनकालिकमंदरशिला ६
संघट्टनव्रणकिणसेवच्छायादीनांसंभवोनास्तीतिच्छायालाघपह्नवः पामरवचनत्वोपन्यासेनाविःकृतः अमत्रतस्यारोपार्थः पर्यस्तापह्नुतिस्तस्य नो

स्फुरेना आविदेवकमलेनरमी लीयोहस्तोयस्याः सा तां विभ्रं २

येऽम्भोधिम्भः किं न हि स्युर्धोम्भः प्रेयसीमुखं यत्र कश्चिद्वस्तुनि तदीयधर्मनिह्नवः अन्यत्र वर्ण्णनीये वस्तुनि तस्य धर्मस्यारोपार्थः पर्यस्तापह्नुतिः यथा चंद्रे चंद्रत्वनि
षेधो वर्ण्णनीये वस्तुनि [illegible] प्रेयसीमुखे तदारोपार्थः यथा वा हालाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते निपीय जागर्ति सु
खेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः पूर्वोदाहरणे हेतूक्तिर्नास्त्यत्र तु सास्तीति भेदः न तस्य पूर्वापह्नुतिवदन्यापि द्वैविध्यमिति द्रष्टव्यं भ्रांतापह्नुतिरन्य
स्य शंकायां भ्रांतिवारणे तापं करोति सोत्कंपं ज्वरः किं न सखि स्मरः अत्र तापं करोतीति स्मरवृत्तांते कथिते तत्साधारण्याद्भ्रान्त्या सख्या ज्वरः किमि
ति पृष्टे न सखि स्मर इति तत्त्वोक्त्या भ्रांतिवारणं कृतं यथा वा नागरिक समधिकोन्नतिरिह महिषः कोऽयमन्नयतः पृच्छः नहि नहि करिकलभोऽयं शुण्डादण्डो
यमस्य न तु पुच्छः इदं संभवद्भ्रांतिपूर्विकायां भ्रांतापह्नुतावुदाहरणं कल्पितभ्रांतिपूर्विका यथा जटा नेयं वेणीकृतकचकलापो न गरलं गले कस्तूरीयं शिर
सि शशिरेखा न कुसुमं इयं भूतिर्नांगे प्रियविरहजन्मा धवलिमा पुरारातिभ्रांत्या कुसुमशर किं मां प्रहरसि अत्र कल्पितभ्रांतिर्जटा नेयमित्यादिनिषेधमात्रे
णैव प्रतीयमानत्वात् पूर्ववत्स्पष्टाभावात् इत्थं तत्र तत्र तत्त्वाख्यानोपमेयस्य उपमानेदं मेने यदाह न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमामते
ति छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे प्रजल्पन्मत्पदे लग्नः कांतः किं न हि नूपुरः कस्याश्चित् कांचित् प्रति रहस्योक्तं वचनं स्वकांतया शुकेनान्यया तदर्थांतरव
र्णनेन तथ्यनिह्नवे छेकापह्नुतिः यथा नायिकया नर्मसखीं प्रति प्रजल्पन्मत्पदे लग्न इति स्वनायकवृत्तांते निवेद्यमाने तदाकर्ण्य कांतः किमिति शंकितव
तीमन्यां प्रति नहि नूपुर इति निह्नवः यथा वा सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचं नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः इदमर्थ
योजनया तथ्यनिह्नवे उदाहरणं शब्दयोजनया निह्नवे उदाहरणं यथा प्रेमेत्य नयने स्मरामि सततं भावो नवस्तज्जतल्ले नीले मुह्यति किं करोमि महितैः क्रीतोऽ

श्रीरामचंद्रमजे ५

स्मितेविभ्रमैः इत्यत्र भवचोऽनुनाथ्यसकृषा निर्भर्त्सितो राधया कम्मलत्वरमेवतद्यपदिशन्क्रीडाविरः पातु वः सर्वमिदं विषयान्तरयोजनेऽदाहरणं विवये।
कोप्यवस्यामेदेन योजने यथा वरंतीजारवृत्तांतं पत्यौ धूर्त्ता सखीधिया पतिं तु धासवितनः प्रबुद्धास्मीत्यपूरयत् केतवापह्नुतिर्यैकौ व्याजाद्यैर्निहुतेः पदैः
निर्यान्तिस्मरनाराचाः कांताहकपातकैतवात् अत्रासत्यत्वाभिधायिना कैतवपदेन नेमे कांताकराघाताः किंतु स्मरनाराचाः इत्यपह्नवः प्रतीयते यथा वा शि
क्षेषु वारिकृष्य याविपिनो दूरेषु मध्याह्नजं नितमलातपतापतप्ताः स्कंधांतरोत्थितदवाग्निशिखाच्छलेन जिह्वां प्रसार्य तरवो जलमर्थयंते संभावना
स्याऽत्प्रेक्षा वस्तुहेतुफलात्मना उक्ताऽनुक्तास्पदा द्यात्र मिहोक्ता सिद्धास्पदे परे धूमस्तोमं तमः शंके कोकीविरहशुष्मणां लिम्पतीव तमोंगानि वर्षतीवांजनं नभ
ः रक्तोनवांघ्रीमृदुलो हविविक्तपल्लधुवं त्वन्मत्वा मेहयानूनं पश्यैवैराग्यतेऽङ्घ्री मध्यः किं कुचयोर्हेत्वेव दः कनकदामभिः यायोक्तं त्वत्पदेनैवं या मंतो येन
पश्यति अत्र धर्मसंबंधनिमित्तेनाप्रस्तुतानां तादात्म्यसंभावनमुत्प्रेक्षा सा वस्तुहेतुफलात्मतागोचरत्वेन त्रिविधा अप्रस्तुतस्य कस्यचिद्वस्तुनस्तादात्म्यसंभाव
नायां वास्वरूपोत्प्रेक्षोच्यते अहेतोर्हेतुभावेनाफलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षा चेत्युच्यते तत्राद्या स्वरूपोत्प्रेक्षोक्तविषयानुक्तविषया चेति द्वि
विधा परे हेतुफलोत्प्रेक्षे सिद्धविषयाः सिद्धविषया चेति प्रत्येकं द्विविधे एवं षडुत्प्रेक्षाणां धूमस्तोममित्यादीनि क्रमेणोदाहरणानि रजनीमुखे सर्वत्र विस्तृत
स्य तमसो नेत्रस्फुटप्रतिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन सद्यः प्रियविरहितसर्वदेशस्थितकोकांगनाहृदयगतप्रज्वलितविरहानलधूमस्तोमता
तादात्म्यसंभावना स्वरूपोत्प्रेक्षा तमसो विषयस्योपादानादुक्तविषया तमोव्यापनस्य नभःप्रभृतिभूपर्यंतसकलवस्तुसंदोहमलिनीकरणेन निमित्तेन नभःकर्तृ
कलेपनतादात्म्योत्प्रेक्षा नभःकर्तृकांजनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रेक्षा उभयत्रापि विषयभूतस्य तमोव्यापनस्यानुपादानादनुक्तविष

कुवलयानंदः
६
6

या नन्वत्र तमसो व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा नभसो भूपर्यंतं गाढनीलिमव्याप्तत्वेन निमित्तेनांजनवर्षणकर्तृतादात्म्योत्प्रेक्षा चेत्युत्प्रेक्षाद्वयमुक्त
विषयमेवास्तु मैवं लिंपति वर्षतीत्याख्यातयोः कर्तृवाचकत्वेपि भावप्रधानमाख्यातमिति स्मृतेर्धात्वर्थक्रियाया एव प्राधान्येन तदुपसर्जनत्वेनान्वितस्य क
र्तुरुत्प्रेक्षणीयतया भवत्यान्वयासंभवात् अत एव हेतोस्तस्योपमायामुपमानतयान्वयो दंडिना निराकृतः कर्ता यद्युपमानं स्यान्न्यग्भूतोसौ क्रियापदे स्व
क्रियासाधनव्यग्रो नालमन्यदपेक्षितुमिति केचित्तु तमोनभसोर्विषययोस्तत्कर्तृकलेपनवर्षणरूपधर्मोत्प्रेक्षेत्याहुः तन्मते स्वरूपोत्प्रेक्षायां धर्म्युत्प्रेक्षा
धर्मोत्प्रेक्षा चेत्येवं द्वैविध्यं द्रष्टव्यं चरणयोस्त्वत्तसिद्धेः किमपि वस्तुतो विक्षेपणं न हेतुरिति हेतोस्तस्याहेतुत्वेन संभावना हेतूत्प्रेक्षा विक्षेपणस्य विषयस्य सत
त्सिद्धविषया चंद्रपद्मविरोधे स्वाभाविके नायिकावदनकांतिप्रेक्षा न हेतुरिति तत्र तद्धेतुत्वसंभावना हेतूत्प्रेक्षा वस्तुतस्तद्धिंसायाश्च अभावादसिद्धविषया
मध्यः स्वयमेव कुचौ धरति न तु कनकदामबंध[illegible]तेनाध्यवसितायाश्च वलित्रयशालितायाः बलादिति मध्यकर्तृककुचधृतेस्तत्फलत्वेनोत्प्रेक्षा सिद्ध
विषया फलोत्प्रेक्षा अलजस्य जले निजावस्थितेरुदवासतपस्त्वेनाध्यवसितायाः कामिनीचरणसायुज्यप्राप्तिर्न फलमिति तस्या गगनकुसुमायमाना(
यास्तपःफलत्वेनोत्प्रेक्षणमसिद्धविषया फलोत्प्रेक्षा अनेनैव क्रमेणोदाहरणांतराणि बालेंदुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि सद्यो
वसंतेन समागतानां नखक्षतानीव वनस्थलीनां अत्र पलाशमुकुलानां वक्रत्वलौहित्यसंबंधेन निमित्तेन वसंतनायकसमागतवनस्थलीसंबंधिसद्यः
कृतनखक्षततादात्म्यसंभावनोक्तविषया स्वरूपोत्प्रेक्षा पूर्वोदाहरणे निमित्तभूतधर्मसंबंधो गम्य इह तूपात्त इति भेदः नन्विवशब्दस्य सादृश्यपरत्वेन प्रसिद्ध
त्वात्तदुपमैवास्तु लिंपतीवेत्युदाहरणे लेपनकर्तुरुपमानत्वाहस्य क्रियोपसर्जनत्ववदिह नखक्षतानामनुपसर्जनत्वस्योपमाबाधकस्याभावात् उच्य

श्रीरामचंद्र भजे
६

ते उपमायाश्चक्रवर्तिस्थितैरपि नखक्षतैः सरवकंःश्यकान्तयावसंतनायकसमागमवनस्थलीसंबंधित्वस्य विशेषणस्यानपेक्षितत्वादिह न उपादानं पलाश
मुकुलानां नखक्षततताद्यात्मसंभावनायामिवशब्दमवस्थापयतीति तथात्वमेव न तद्विशेषणसाफल्यात् अस्ति च संभावनायामपीवशब्दः दूरेति शब्देवदन्तद
वनातीति विनष्टीव तरंगाग्रैः समुद्रः फेनचंदनं तदादाय करैरिंदुर्लिम्पतीव दिगंगनाः अत्र तरंगाग्रैः फेनचंदनस्य प्रेरणं पेषणं तयोर्व्यस्तत्वे समुद्रादुत्थित
सचंद्रस्य प्रथमं समुद्रपूरे प्रसृतानां कराणामादित्वव्यापनं च समुद्रोपात्तफेनचंदनकृततल्लेपनत्वेनोत्प्रेक्षिते उभयत्र क्रमेण समुद्रप्रांतगतफेनचंदनपुंजीभ
वनं दिशांधवलीकरणं च निमित्तमिति फेनचंदनप्रेरणकिरणव्यापनयोर्विषययोरनुपादानाद्वक्तृविषये स्वरूपोत्प्रेक्षे येषां तृणानयोः समुद्रचंद्रयोरेव
तत्कर्तृकपेषणलेपनरूपधर्मोत्प्रेक्षेति मतं तेषां पूर्वोदाहरणे धर्मिणि धर्मान्तरतादात्म्योत्प्रेक्षात्वादिह तु धर्मिणो धर्मसंसर्गोत्प्रेक्षेति भेदोवगंतव्यः रात्रौ रवेर्दिवा
चंद्रोरमावादिवसप्रभुः भ्रमो प्रतापयश्शी स्पष्टवान्सततोदिते रात्रौ रवेर्दिवा चंद्रस्याभावः सन्नपि प्रतापयशः सर्गेन हेतुरिति तस्यतद्धेतुत्वसंभावनावनासि
द्धविषयाहेतूत्प्रेक्षा विवस्वतानायिषतेव मिथ्याः स्वगोसहस्रेण समंजनानां गावोपि नेत्रापरनामधेयास्तेनेदंमांधं स्वल्पनाधकारैः अत्र विवस्वता कान्तस्य किरणैः
सहजनलोचनानां नयनमसदेव राज्ञावाधं प्रतिहेतुत्वेनोत्प्रेक्षितेऽसिद्धविषयाहेतूत्प्रेक्षा एवं विकर्वर्धयितुं पयोधेः शंकेयमेणांकमणिं कियंति पयांसिदो
ष्णि प्रियविप्रयोगे सशोककोकीनयने कियंति अत्र चंद्रेण कृतं समुद्रस्य वृंहणं सदेव तेन कृततत्स्यचंद्रकान्तद्रावणस्य कोकांगनावाष्पस्रावणस्य च फलत्वेनो
त्प्रेक्षितमिति सिद्धविषयाफलोत्प्रेक्षा रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानां उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्यां अत्रोत्तरायण
स्याश्वपरिवर्तनमसदेव फलत्वेनोत्प्रेक्षितेऽसिद्धविषयाफलोत्प्रेक्षा एताएवोत्प्रेक्षाः मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षाव्यञ्जनेश्शब्दैरिवशब्दोपि

नाट्शंसुस्थेनाव्यंजकत्वेन परिगणितानां शब्दानामप्रयोगगम्यो भेदः यथा त्वत्कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगामिति रूपकातिशयोक्तिः स्यान्निगीर्या
ध्यवसायतः पद्मनीलोत्पलद्वंद्वान्निःसरंति शिताः शराः विषयस्य स्वशब्देनोल्लेखनं विना विषयिवाचकेनैव शब्देन ग्रहणं विषयनिगरणं तत्पूर्वकं विषयस्य विष
यिरूपतयाध्यवसानमाहार्यनिश्चयस्तस्मिन् सति रूपकातिशयोक्तिः यथा नीलोत्पलशरशब्दाभ्यां लोचनयोः कटाक्षाणां च निगरणपूर्वकं तद्रूपताध्यवसानम्
यथा वा वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्या सोपानालीमधिगतवती कांचनीमैंद्रनीली अग्रे शैलौ सुकृतिसुगमौ चंदनच्छन्नदेशौ तत्रत्यानां सुलभम
मृतं सन्निधानात्सुधांशोः अत्र वाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः अत्रातिशयोक्तौ रूपकविशेषणं रूपके निर्दिष्टानां विधानामिहापि संभवोऽस्तीत्यतिदेशो
नप्रदर्शनार्थं तेनाभेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिरिति द्वैविध्यं तत्राप्याधिक्यन्यूनत्वानुभयं चेति सर्वमनुसंधेयं यथा वा सुधाबद्धग्रासैरुपवनचकोरैरनुसृ
तां किरन् ज्योत्स्नामच्छां लवलिफलपाकप्रणयिनीं उपप्राकाराग्रं प्रहिणु नयने तर्कय मनागनाकाशे कोऽयं गलितहरिणः शीतकिरणः अत्र कोऽयं गलितहरि
णः इत्युक्त्या प्रसिद्धचंद्राद्भेदस्तत उत्कर्षश्च गर्भितः एवमन्यचाप्यूहनीयं यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता त्वत्सूक्तिषु सुधा राजन् भ्रांताः पश्यंति तां विधौ अत्र
त्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिः चंद्रमण्डलस्थममृतं न भवतीत्यपह्नुतिगर्भा यथा वा मुक्ताविद्रुममंतरा मधुरसः पुष्पं परं ध्वर्वहं शालेयफलति मणुले
रत्वंतयोरेकाभिकानार्णवे तच्चेदं चतिशंखमूर्ध्नि न पुनः पूर्वाचलाभ्यंतरे तानीमानि विकल्पयंतितरामेषां न साहस्कवये अत्राधररस एव मधुररस इत्याद्यतिश
योक्तिः पुष्परसो न मधुरस इत्यपह्नवगर्भा अलंकारसर्वस्वकृता स्वरूपोत्प्रेक्षायां सापह्नवत्वमुक्तं गतास्तु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु यत्रो
त्प्रसत्सेन तन्निच्छलेन मुक्ताट्टहासैव विभाति सिंधुः इति तत्र त्वियानत्र भेदः यत्र स्वापह्नुतिगर्भत्वमुक्तं यत्र फेन न तत्त्वमपह्नुतं तत्रैवाट्टहासत्वोत्प्रेक्षणात् इह

श्रीरामचंद्रंभजे
७

नुपर्यस्तापह्नुतिगर्भत्वं रुद्रमण्डलाह्वापह्नुतसाम्नताद्रेः सत्यादिषु निवेशनात् इदं पर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि संभवतीति तत्स्वरूपोत्प्रेक्षायां यथा जाने
ति रागादिद्मेव बिम्बं बिंबस्य च यत्क्रमितोधरत्वं द्वयोर्विशेषावगमाक्षमाणां नाम्निभ्रमोऽद्र्दनयोर्जनानां अत्र प्रसिद्धफले बिम्बतामपह्नुत्यातिरागेण निमित्तेन दम
यं सधरेनऽत्प्रेक्षा पर्यस्तापह्नुतिगर्भा हेतूत्प्रेक्षायां तद्गर्भत्वं प्राक् लिखितेन हेतूत्प्रेक्षोदाहरणएव द्रष्टव्यं तेन त्वचांधकारे स्वांग्रहेतुत्वमपह्नुत्यान्यत्र निवेशितं फलोत्प्रे
क्षायां यथा रविनतोगजः पद्मान्नतहस्त्यान्वाधितं ध्रुवं सरो विशति नस्नातुं गजनस्नानं हिनिः फलं अत्र गजस्य सरः प्रवेशं प्रतिफलत्वेन स्नानेफलत्वमपह्नुत्य प्र
मवाधनेतन्निवेशितं अलमनया प्रसक्त्यानुप्रसक्त्या प्रकृतमनुसरामः भेदकातिशयोक्तिस्तु नसैवान्यत्ववर्णनं अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपते
: अत्रलोकप्रसिद्धगांभीर्यादिभ्योभेदेपि भेदो वर्णितः यथा वा अन्येयं रूपसंपत्तिरन्यावैदग्ध्यधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः संबंधाति
३२६ शयोक्तिः स्यादयोगे योगकल्पनं सौधाग्रशालिश्रृंगासमसंगंतिविधुमण्डलं यथा वा कतिपयदिवसैः क्षयं प्रयायात्कनकगिरिः कृतवासरावसानः इति
मुदमुपयाति चक्रवाकी वितरणशालिनि वीरहृद्देवे अत्र चक्रवाकास्यांत्तमयकारकमहामेरुक्षयसंभावनाप्रयुक्तसंतोषासंबंधेपि तत्संबंधो वर्णि
तः योगेऽप्ययोगरूपसंबंधातिशयोक्तिरितीर्यते त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे अत्र स्वर्द्रुमेषादरसंबंधेपि तदसंबंधो वर्णितः यथा वा अनयोरन
वद्यांगि स्तनयोर्जृम्भमाणयोः अवकाशोनपर्याप्तस्तव बाहुलतांतरे अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आलिंगंति समं देव ज्यां शराश्च पराश्च
ते अत्र मौर्व्यां यदा शरसंधानं तदानीमेव शत्रवः पतंतीति हेतुकार्ययोः सहत्वं वर्णितं यथा वा मुंचति मुंचति कोशं भजति भजति प्रकंपमरिवर्गः हम्मीरवी
रखड्गे सजति सजति क्षमामाशु अत्र खड्गस्य कोशात्यागादिकाल एवरिपूणां धनगृहत्यागादि वर्णितः चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे यास्यामीत्य

दितेन त्वा वलयो नवरूर्मिका अत्र नायकप्रवासप्रसक्तिमात्रेण योषितो नीति कार्श्यं कार्यमुखेनैव प्रदर्शितं यथा वा आदाय सकरीरितैः पिञ्जलस्त्रमे हस्ताग्रमाले
हितं त्वां हारं जनवार्जयापि महसा रक्तं तलमाद्ययोः अंगानामनुलेपनस्मरणमप्यसंतरवेदावहं हंतार्धीरहृशः किममद्दलकामोदौ विनाशयते यथा वा यामि
नयामीति धवे वदति पुरस्तात्तरलेनेन नत्वंगणः गलितानि पुरोवलयानपराणपितं अथैव दलितानि अत्र तानि शयोक्तिस्ता पौर्वापर्यव्यतिक्रमे अयमा
नोगतः पश्चादनुनीता वियोगेसा यथा वा कवीन्द्राणाम्मासन्प्रथमतरमेवांगणभुवश्चलड्गासंगाकुलकरिमदामोदमधुकराः अमी पश्चान्नेवाप्नुपरिष
नितारुद्दनृपतेः करास्ताः क्षीरोदप्रसरदुरुवीचीसहचराः एतावतिशयोक्तयः कार्यशैघ्र्यप्रत्यापनार्थाः वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता सं
कुचंति सरोजानि स्वैरिणीवदनानि च त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते मालतीशशभृल्लेखाकदलीनां कठोरता प्रस्तुतानामप्रस्तुतानां वा गुणक्रियाभि
रेकधर्मान्वयः तुल्ययोगिता संकुचंतीति प्रस्तुततुल्ययोगितायामुदाहरणं तत्र प्रस्तुतचंद्रोदयकालीनतया वर्णनीयानां सरोजानां प्रकाशमीरुस्वैरिणीवद
नानां च संकोचरूपैकक्रियान्वयो दर्शितः उत्तरश्लोके नायिकासौकुमार्यवर्णने प्रस्तुतेः वर्णनीयानां मालत्यादीनां कठोरतारूपैकगुणान्वयः यथा वा सं
जातपत्रप्रकराञ्चितानि समुद्वहंति स्फुटपाटलत्वं विकस्वराण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वृद्धिमीयुः नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कद
लीविशेषाः लब्धापि लोके परिणाहि रूपं जातास्त्वदूर्वोरुपमानबाह्याः अत्राद्ये ऋतुवर्णनेन तद्यत्वेन प्रस्तुतानां दिनानां पद्मानां चैकक्रियान्वयः उत्तरवर्णने ना
प्रस्तुतानां करिकराणां कदलीनां चैकगुणान्वयः हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया अत्र हिताहितयोर्मित्रशात्र
वयोस्तुल्यशब्दनिर्देशनस्यपरावत्यादानस्य च श्लेषेणा नेदाध्यवसायात्तृत्तितौल्यं यथा वा यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा यश्चैनं गंधमाल्याद्यैः सर्वस्य कटु

अहितामित्रदस्युशात्रवशत्रवइत्यमरः

रिवसः अत्र कृष्णेति सिंचसर्वेतीसुधाहार्यैर्वाक्यानि प्रत्यणीयानि पूर्वोदाहरणं स्तुतिपर्यवसायि इदं निंदापर्यवसायीति भेदः इयं सरस्वतीकंठाभरणोक्ता
तुल्ययोगिता गुणोत्कृष्टैः समीकृत्य वचोन्या तुल्ययोगिता लोकपालो यमः पाशी श्रीदः शक्रो नवानपि अत्र वर्णनीयो राजा शक्रादिभिर्लोकपालत्वेन समीकृ-
तः यथा वा संगतानि मृगाक्षीणां तडिद्विलसितान्यपि क्षणद्वयं न तिष्ठंति घनारब्धान्यपि ध्रुवं इयं च स्तुतिरिह निंदा इयं काव्यादर्शे दर्शिता इमां तुल्ययो-
गुणवत्वेनप्र सिद्धेषु गितां सिद्धिरिति केचिदाहुः यदाह जयदेवः सिद्धिः ख्यातेषु चेन्नामकीर्तनेन तुल्यतोक्तये युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैरिति मतान्तरेऽत्र च स
माणदीपकमेव वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं तु यथा मदेन भाति कलभः प्रतापेन महीपतिः प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकं यथा कलभ-
नरपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः यथा वा मणिः शाणोल्लीढः समरविजयी हेतिदलितो मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः कला-
शेषश्चंद्रः सुरतमृदिता बालवनिता तनिम्ना शोभंते गलितविभवाश्चार्थिषु नृपाः अत्र प्रस्तुतानां नृपाणामप्रस्तुतानां मण्यादीनां शोभैकधर्मान्वयः प्रस्तु-
तैकनिष्ठः समानो धर्मः प्रसंगादप्रस्तुतोपकरोति प्रासादार्थमारोपितो दीपो रथ्यायामिव दीपसादृश्याद्दीपकं संज्ञायां चेतीवार्थे कन्प्रत्ययः यद्यपि स्ववर्णेषु
पांशुविंदीविनिंतिप्ररूपास्तुयः स्वरस्वकृतविघ्नस्वयस्यजानाति सेवितं अत्र प्रस्तुताप्रस्तुतानां युगपद्धर्मान्वयः प्रतिभाति मदेन भाति कलभ इत्यत्राप्रस्तु-
तस्यैव प्रथमं धर्मान्वयः तथापि प्रासंगिकत्वं न हीयते वस्तुगत्या प्रस्तुतोद्देशेन प्रवृत्तस्यैव वर्णनस्याप्रस्तुतेष्वन्वयात् नहि दीपस्य रथ्याप्रासादयोर्युगपदुप-
कारकत्वेन ज्ञामात्रार्थे स्थापितस्य तत्प्रसादातिथिमः प्रथमपरिवेषणेन च प्रासंगिकत्वं हीयते तुल्ययोगितायां त्वेकं प्रस्तुतमन्यदप्रस्तुतमिति विशेषाग्रहणात्
सर्वोद्देशेनैव धर्मोक्तिरिति विशेषः अयं चानयोरपरो विशेषः उभयोरनयोरुपमालंकारस्य गम्यत्वाविशेषेऽपि अत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति

कुवलयानंद०
१८
१

यत्र स्थितउपमानोपमेयभावस्तत्रत्वविशेषाग्रहणादेकोक्तिः सहस्ति त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी उन्मीलंति
कदंबानि स्फुटंति कुटजोद्गमाः माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः दीपकस्थाने कोपकारार्थकतया दीपस्थानीयस्य शब्दस्यार्थस्य वा उभयोर्वावृत्तौ ।
त्रिविधमावृत्तिदीपकं क्रमेणार्द्धत्रयेणोदाहरणानि यथा वा उत्कंठयति मेघानां माला वर्गं कलापिनां यूनां चोत्कंठयत्यद्य मानसं मकरध्वजः भ्रमयति
जलधरधारानिकरस्यूनां नृपं चिरोपनतं शमयति च भूलोचनजलधाराकामिनां प्रवासरुचिं वदनेन निर्जितं तव निलीयते चंद्रबिंबमंबुधरे अरविंदमपि
च स्वंदरि निलीयते पाथसां पूरे एवं चावृत्तीनां प्रकृताप्रकृतोभयविषयत्वाभावे विदीपकच्छायापत्तिमात्रेण दीपकव्यपदेशः वाक्ययोरेकसामान्ये प्रतिव
स्तूपमा मता तापेन भ्राजते सूरः शूरश्चापेन राजते यत्रोपमानोपमेयपरवाक्ययोरेकः साधारणो धर्मः पृथङ्निर्दिश्यते सा प्रतिवस्तूपमा प्रतिवस्तु प्रतिवा
क्यार्थमुपमा समानधर्मोऽस्यामिति व्युत्पत्तेः यथात्रैव भ्राजते राजत इत्येक एव धर्म उपमानोपमेयवाक्ययोः पृथङ्निर्दिष्टः यथा वा स्थिरा शै
ली गुणवतां खलबुद्ध्या न बाध्यते रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते यथा वा तवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यदिच्छति स्थितेर
विंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरसं हि वीक्षते अत्र यद्युपमेयवाक्ये अन्यदिच्छा उपमानवाक्ये न वीक्षेति धर्मभेदः प्रतिभाति तथापि वीक्षणमात्रस्यावज्ञे
नीयस्य प्रतिषेधानर्हत्वाद्दिदृक्षापूर्वकवीक्षाप्रतिषेधोयमित्यन्यदिच्छापर्यवसित एवेति धर्मैक्यमनुसंधेयं अर्थावृत्तिः प्रकृतानामप्रकृतानां वा प्रतिवस्तूपमा तु प्र
कृताप्रकृतानामिति विशेषः अयं चापरो विशेषः आवृत्तिदीपके वैधर्म्येण न संभवति प्रतिवस्तूपमा तु वैधर्म्येणापि दृश्यते यथा वा विद्वानेव हि जानाति
विद्वज्जनपरिश्रमं नहि वंध्या विजानाति गुर्वीं प्रसववेदनां यदि संति गुणाः पुंसां विकसंत्येव ते स्वयं नहि कस्तूरिकामोदः शपथेन विभाव्यते चोदं वशति

श्रीरामचंद्रजते
९

बिंबत्वं दृष्टान्तस्तदलंकृतिः त्वमेव कीर्त्तिमान्राजन्विधुरेव हि कान्तिमान् अत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिंबप्रतिबिंबभावेन निर्दिष्टौ तत्र दृष्टान्तः त्वमे
व कीर्त्तिमानित्यत्र कीर्त्तिकान्त्योर्बिंबप्रतिबिंबभावः यथा वा कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिं नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव
रात्रिः यथा वा दैवीं वाचमुपासते हि बहवः सारं तु सारस्वतं जानीतेऽतितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः अब्धिर्लंघित एव वानरभटैः किं त्वस्य गंभीरतामा
पातालनिमग्नपीवरतनुर्जानाति मंथाचलः नन्वत्रोपमानोपमेयवाक्ययोर्ज्ञानमेक एव धर्म इति प्रतिवस्तूपमायुक्ता मैवं अचेतनेन मंथाचलेन ज्ञानस्य बाधितत्वे
न तज्ज्ञानानीयनेन सागराधस्तलावधिसंस्पर्शमात्रस्य विवक्षितत्वात् अत्रोदाहरणे पदावृत्तिदीपकाद्विशेषः एवं वस्तुतः प्रस्तुतविषयत्वकृतोऽस्याः वैध
र्म्येणाप्ययं दृश्यते कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां वाक्यार्थयोः सदृश
योरैक्यारोपो निदर्शना यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलंकिता अत्र दातृपुरुषसौम्यत्वस्योपमेयवाक्यार्थस्य पूर्णेन्दोरकलंकत्वस्योपमानवाक्यार्थस्य च यत्तद्भ्यामै
क्यारोपः यथा वा अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितं श्वपुच्छमवनामितं बधिरकर्णजापः कृतो धृतोऽन्धमुखदर्पणो यदबु
धो जनः सेवितः अत्राबुधजनसेवायाः अरण्यरोदनादीनां च यत्तद्भ्यामैक्यारोपः पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनां त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुजन्मनोः अत्रने
त्रयुगले नीलांबुजगतलीलापदार्थारोपो निदर्शना यथा वा वियोगे गौडनारीणां यो गण्डतलपाण्डिमा अदृश्यत स खर्जूरीमञ्जरीगर्भरेणुषु एवमस्मिन्नुदाहरणे उप
मेये उपमानधर्मारोप इह तूपमाने उपमेयधर्मारोप इति भेदः उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेन तत्समानधर्माक्षेपादौपम्यपर्यवसानं तत्सं इयं पदार्थवृत्तिनिदर्शना
ललितोपमेति जयदेवेन व्यवहृता यद्यपि वियोगे गौडनारीणामिति श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतस्तथापि विशिष्टयोर्धर्मिणोरैक्यारोपो वाक्यार्थवृत्ति

बिंबप्रतिबिंब[redacted]भावापन्नधर्मविशिष्टयोः

निदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शनेति व्यवस्थामाश्रित्यास्माभिरयमिहोदाहृतः एवं च त्वयि सति शिवदातर्यस्मदभ्यर्थितानामि
तरमनुसरंतो दर्शयंतोर्थिमुद्रां चरमचरणपातेऽर्थ्यहं दोग्धुकामाः करममनुसरामः कामधेनौ स्थितायां दोर्भ्यामब्धिं तितीर्षन्तस्तुष्टुवुस्त्वद्गुणार्णवम् इत्यादिषु वाक्ये
र्शना चेऽपि वाक्यार्थवृत्तिरेव निदर्शना विशिष्टयोरैक्यारोपसद्भावात वाक्यार्थयोस्सदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टरूपयोः प्र
स्तुताप्रस्तुतधर्म्मिणोर्विवक्षितत्वात् एवं च राजसेवा मनुष्याणामसिधारावलेहनं पंचाननपरिष्वंगो व्यालीवदनचुंबनमित्यत्र प्रस्तुताप्रस्तुतवृत्तांतयोरैकैकपदोपात्त
त्वेपि वाक्यार्थवृत्तिनिदर्शनायां न क्षतिः तयोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति अत एव निदर्शनायां रूपकाद्भेदः रूपके ह्यविशिष्टयोरेव मुख
चंद्रादिकयोरैक्यारोपः अंघ्रिदंडो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे विधिविष्टरपद्मस्य नालदंडो मुदेऽस्तु वः इति विशिष्टरूपकोदाहरणेऽपि न बिंबप्रतिबिंबभावापन्नव
स्तुविशिष्टता विधातृविष्टरकमलश्लिष्टत्वरूपसाधारणधर्मकत्वसम्पादनार्थमेव तत्र विशेषणोपादानात् यद्दातुः सौम्यतेत्यादिनिदर्शनोदाहरणे सुदातृपूर्णेन्द्वादीनामा
नंदकरत्वादिनेवात्र विशेषणयोर्बिंबप्रतिबिंबभावाभावात् यत्र तु विषयविषयिविशेषणानां परस्परसादृश्येन बिंबप्रतिबिंबभावोऽस्ति ज्योत्स्नाभस्मच्छुरणधवला बिभ्र
ती तारकास्थीन्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयं द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राकपाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य च्छलेन इति सावयवरूपकोदाहर
णे तत्रापि विषयविषयिणोस्तद्विशेषणानां च प्रत्येकमेवैक्यारोपः न तु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टकापालिकीरूपविषयिणश्च विशिष्टरूपेणैक्या
रोपोऽस्ति तस्माद्राजसेवा मनुष्याणामित्यादावपि वाक्यार्थवृत्तिनिदर्शनेति युक्तं मतांतरे त्विह पदार्थवृत्त्यैव निदर्शना भाव्या अपरां बोधनं प्राहुः क्रियया सत्सदर्थयोः न
श्येद्राजविरोधीति क्षीणं चंद्रोदये तमः उदयन्नेव सविता पद्मेष्वर्पयति श्रियं विभावयन्समृद्धीनां फलं सुहृदनुग्रहं कस्यचित्किंचित्क्रियया विशिष्टस्य स्वक्रियया परान् प्र

समतः सतो वार्थस्य बोधनं यन्निबध्यते तेन द्वपरा निदर्शना मा ऊः असदर्थबोधने उत्तरार्द्धमुदाहरणं न च न शोभेदिति बोधयदिति वक्तव्ये बोधयदिः स्या गम्यमानत्वादप्रयोगस्तत्र
राज्ञा चंद्रेण सह विरुध्यस्व यं नाज्ञा क्रियया विशिष्टं नभः स्वकीयनाज्ञा क्रियया हृष्टां नभूतं याः शोभेयं राजविरुद्धस्त्वेन्न शोभेदिति निष्टपर्यवसायिनमर्थं बोधयदेव न श्रमिति निबंध
नादसदर्थनिदर्शना तथा उत्तरश्लोके सविता स्वोदयसमय एव पद्मेषु लक्ष्मीमादधानस्तया पद्मलक्ष्माधानक्रियया परानुप्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्क
रमर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना यथा वा उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतः पृषद्गणश्चारुमारुतधुतः पतत्यधः अत्र गिरिशिख
रगतो वृष्टिबिंदुगणो मंदमारुतमात्रेण कंपितः पतन् उन्नतपदप्राप्तिः पतनहेतुरित्यसदर्थं बोधयन्निबद्ध इत्यसदर्थनिदर्शना' चूडामणिपदे धत्ते यो देवं रविमागतम्
सतां कार्यातिथेयीति बोधयन् गृहमेधिनः अत्र समागतं रविं शिरसा संभावयन्नुदयाचलः स्वनिष्ठया रविधारणक्रियया समागतानां सतामेवं गृहमेधिभिरातिथ्यं कार्य
मिति सदर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना अत्र केचिदाकार्यं वृत्तिपदार्थवृत्ति निदर्शनाद्वयमसंभवद्वस्तुसंबंधनिबंधनमिति तृतीयां तु संभवद्वस्तुसंबंधनिबंध
नेति च व्यवहरन्ति' तथाहि' आद्यनिदर्शनायां वाक्यार्थयोरैक्यमसंभवत्तयोः साम्ये पर्यवस्यति द्वितीयनिदर्शनायामप्यन्यधर्मोऽन्यत्रासंभवन् धर्मिणोः साम्ये पर्यवस्यतीति तृती
सदर्थ यनिदर्शनायां तु स्वक्रियया परान्प्रति सदर्थबोधनं संभवदेव समतां गमीकरोमीति बोधयन् गृहमेधिन इत्यादौ हि कारीषोऽग्निरध्यापयतीतिवत्सामर्थ्याचरणे णिचः प्रयोगस्त
त्स्वयथाकारीषोऽग्निः शीतापनयनेन बटूनध्ययनसमर्थान् करोति एवं वर्ण्यमानः पर्वतः स्वयमुपमानभावेन गृहमेधिन उक्तबोधनसमर्थान् कर्तुं स्वमते यथायं पर्व
तः समागतं रविं शिरसा संभावयसे एवं गृहमेधी समागतं संतमुचितपूजया संभावयेदिति अतः संभवन्निबोधनसंबंध इति व्यतिरेको विशेषश्चेदुपमानोपमेययोः शै
लादयोऽन्नताः संतः किंतु प्रकृतिकोमलाः अयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः यथा वा पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर भूषयति कर्णमेकः परस्तु।

दृष्टांतेस्वस्मिन्भूतया विधमानया दृष्टांतीकृतः संज्ञा बोधयेति वा
जलबिंदुसमूहः
एतद्देयोपपादयति
विशेषो भेदः लक्षणं
अत्रोपमेयस्य करस्योत्कर्षः

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकमिति ।

कुवलयानंद०

२१

अत्र च तत्तीयायां निरूपितत्वादेकतया प्रत्यर्थिनिरूपितसाहित्यवती । कीर्तिगमनाश्रय इति बोधे एकधर्मान्वयितरूपसाहित्यवैलक्षण्यप्रत्यर्थिनाम प्रति मुनान्वय इतीति ॥

रुत्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः अनुपपर्यवसायी यथा १

कर्णान्तिरस्कुरुते तन्मूलत्वपर्यवसायी यथा ' इदतरनिबद्धमुखैः कोशानिषण्णस्य सहजमलिनस्य कृपणस्य कृपाणस्य च केवलमाकारतो भेदः सहोक्तिः सहभावस्थेनासते (
जनरंजनः दिगन्तमागमत्तस्य कीर्तिः प्रत्यर्थिभिः सह यथा वा छायासंश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह आयाम सहि
मांशुदीधितिरपस्तस्नेव लोकैः समं निशागर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः जनरंजन इत्युक्तेः अनेन सार्धं विहराम्बुराशेरित्यादौ न सहोक्तिरलंकारः विनोक्तिश्चेद्विना
किंचिदयुक्तं तद्धीनमुच्यते विद्यावत्यपि सा वध्या विना विनयसंपदं यथा वा मृगशावकं न पश्येत्सुपञ्चरागो न पश्यति निंदितः सन्नवेश्मलोके स्वात्माप्येन विगर्हिते अत्ररा(
मदर्शनं विना निंदितत्वक्रिया शब्दमंतरेणापि प्रदर्शितं तद्वेद्विकिंचिद्विना रम्यं विनोक्तिः सापि कथ्यते विना खलैर्विनात्येभाराजेंद्र नवतः सभा यथा वा आविर्भूते शशिनि(
तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगारोधःपतनकलुषा गृह्णतीव प्रसादम् अत्र तमःप्रभृतीनि(
विनानिशादीनां रम्यत्वं विनाशब्दमंतरेण प्रदर्शितं समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् अयमैंद्रीमुखं पश्य रक्तश्चुम्बति चंद्रमाः यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशे(
षणसाम्यबलादप्रस्तुतस्यापि परिस्फूर्तिः स समासोक्तिरलंकारः समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तान्तयोर्वचनात् उदाहरणमयमैंद्रीति अत्र चंद्रस्य प्राचीप्र
रंभसंबंधलक्षणो उदये वर्ण्यमाने मुखशब्दस्य द्वारवदनसाधारण्याच्चंद्रमः शब्दगतपुंल्लिंगेनैंद्रीगतस्त्रीलिंगेन च प्रतिपाद्येऽसंबंधित्वेन चोपस्कृतादप्रस्तुतपरवनितास
क्तकामुकवृत्तान्तः प्रतीयते यथा वा बालातरुणचनारमाकुलकचं व्यालोलहारावलि प्रेंखत्तरकुंडलं श्रोणिनिगडं स्युगलं प्रस्वेदिवक्त्राम्बुजं रभस्वहनकरप्रहारमधिकश्वासं र
सादेन या यस्मात्कंदुकसारं सस्नगयासं सेयमेतत्कृती अत्र कंदुकवृत्तान्ते वर्ण्यमाने बालातरुणचनारमित्यादिविशेषणसाम्याद्विपरीतरतासक्तनायिकावृत्तान्तः प्र
तीयते एवं च विशेषणानि श्लिष्टानीह साधारणानीति भेदः सारूप्यादपि समासोक्तिर्दृश्यते यथा पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं याता घनविरलमा

श्लिष्टत्वात् यद्यपि चुंबतीत्यत्र न श्लेषः तथाप्यर्थद्वयबोधकत्वमात्रेण नस्य साधारण्योक्तिः

यथा प्रस्तुतलक्षणस्य वक्ष्यमाणे असाधारण्यमात्रं दृष्टविप्रकृता प्रकृतश्लेषो ऽ इति व्याख्यातं ॥ तन्मात्रसाम्यादित्यर्थः ॥ एवं च विशेषणमात्र [illegible] साम्य [illegible] तवृत्तान्तत्वं [illegible] तन्ने श्रीरामचंद्रनेत्रे पवृत्तान्तस्य विशेषणवाचिना श्लिष्टेन शब्देन पदेनाप्यवगमान्नातिव्याप्तिः

चंद्रशब्दस्या [illegible] कामुकसाधारणत्वेऽप्यनेतासप्रस्तुताद्यो संबंधमात्रपरस्य आकार्यान्तरसाधारण्यं ॥४॥

साधारण्यादित्यस्य विशेषणं । तत्र चंद्रमःशब्देन पुंल्लिंगेन नायकत्वाभिव्यक्त्या उपस्कारः ॥

वः। इति निरुक्तं । उद्दिष्टं कालात्परमिव मन्येऽवनमिदं निवेशः शैलानां तदिदमिति बुद्धिं दर्शयति । अत्र च वनवर्णनेऽप्रस्तुतेन तत्सारूप्यात्कुटुंबि पृथुधनसंतानादिस
मृद्धसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तांतः प्रतीयते । अत्र च विशेषणसाम्यात्सारूप्याद्वा यदप्रस्तुतवृत्तांतस्य प्रत्यायनं तत्प्रकृते विशेष्येत
त्समारोपार्थं । सर्वथैव प्रस्तुतानन्वयिनः कविसंरंभगोचरत्वायोगात् । तत्र च समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुर्न तु रूपक इव प्रस्तुते प्रस्तुतरूप(
समारोपोप्यस्ति । मुखं चंद्र इत्यत्र मुखे चंद्रत्वारोपहेतुश्चंद्रपदसमभिव्याहारवशात् । श्रुवति चंद्रमा इत्यादिसमासोक्त्युदाहरणे चंद्रादौ जारत्वाद्यारोपहेतोस्तद्वाचकपदसमभि
व्याहारस्याभावात् । निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः । धारानिपातैः सह किं नु वांतश्चंद्रोयमित्यार्ततरं ररास । इत्याद्येकदेशविवर्तिरूपकोदाहरण
इवाप्रस्तुतेः प्रस्तुतरूपसमारोपणमकारणाप्यभावात् । तत्र हि विद्युन्नयनैरित्यत्र निरीक्षणानुगुण्यादुत्तरपदार्थप्रधानमयूरव्यंसकादिसमासाश्रयणस्थितावुत्तरपदार्थस्
तनयनानन्वयानुरोधात्पयोदेऽनुक्तमपि द्रष्टृत्वरूपत्वरूपणांगमभ्युपगम्यते न चेह तथा निरीक्षणवस्थ्यागते किमिति वेपत एष सिंधुरिति श्लोके सेतुकृत्वादिवत्प्रस्तुता(
साधारणवृत्तांतउपात्तोस्ति । नापि श्लिष्टसाधारणादिविशेषणसमर्पितयोः प्रस्तुताप्रस्तुतवृत्तांतयोरप्रस्तुतरूपवृत्तांतस्य विद्युन्नयनवत्प्राधान्यमस्ति येन तदनुरोध
त्वं स्तेनमंथरत्वादिस्वत्रेव पयोदऽस्यत्रैव वाऽनुक्तमपि प्रस्तुते प्रस्तुतरूपसमारोपमभ्युपगच्छेत् । तस्माद्विशेषणसमर्पिताप्रस्तुतव्यवहारसमारोपमात्रमिह चारुताहे
तुः । यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसाधारणविशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्येणैव साक्षात्दन्वयादस्ति समप्राधान्यं तथाप्यप्रस्तुत
वृत्तांतान्वयानुरोधान्न प्रस्तुते प्रस्तुतरूपसमारोपोंगीकार्यः । तथाहि । यथा प्रस्तुतविशेष्येनास्य प्रस्तुतवृत्तांतस्यान्वययोग्यता न तथैवाप्रस्तुतेऽपि जारादेर्नास्ति प्रकृ
तिवृत्तांतस्यान्वययोग्यता । एवं च समप्रधानयोः प्रकृताप्रकृतवृत्तांतयोरन्यतरस्यावश्यमारोपेऽभ्युपगंतव्ये श्रुत एव प्रस्तुते प्रस्तुतवृत्तांतस्यारोपश्चारुताहेतुरिति युक्तम्

कुवलयानंद० १२

नन्वेवं सति विशेषणसाम्यादप्रस्तुतस्यागम्यत्वे समासोक्तिः विशेषणानां साम्येन यत्र प्रस्तुतवर्त्तिनां अप्रस्तुतस्यागमत्वे सा समासोक्तिरिष्यते इत्यादीनि प्राचीनानां स
मासोक्तिलक्षणानि न संगच्छेरन् प्रस्तुते श्लिष्टसाधारणादिरूपविशेषणसमर्पितानुरागपूर्वकवदनचुंबनाद्यप्रस्तुतवृत्तांतसमारोपमात्रस्य वाच्यतान्हेतुत्वाभ्युपगमेन
विशेषणसाम्यकृतकार्यकारणप्रस्तुतधर्मिसंबंधित्वेनावगम्यमानस्य तत्समारोपस्तथाभूतस्यैव रसानुगुणत्वात् न च तावदवगमने विशेषणपदानां सामर्थ्यमस्ति अत्र
श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वदनचुम्बनादिना तत्संबंधिनि कामुकादाववनियतत्वेऽपि न तु नदीयत्वानुसंधानं तत्र भवति स्वरूपतो दृष्टेन राजाद्यादि
नातत्संबंधिनि राजादौ स्मारितेऽपि नरम्यादौ नदीयत्वानुसंधानवदिति विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापेक्षा अत एव श्लिष्टविशेषणायामिव सा
धारणविशेषणायामप्यप्रस्तुतव्यवहारसमारोपः स एव प्राचीनानां प्रवादः कंडुकेष्वाबलात्कुचमारत्वादिविशिष्टवनितासेव्यत्वस्य कामुकसंबंधित्वेनैव समारोपणी
यत्वात् स्वरूपतः कंडुकेऽपि तत्साम्यत्वेन समारोपणीयत्वात् किंच सारूप्यनिबंधनत्वेनोदाहृतानां समासोक्त्यावप्रस्तुतवृत्तांतस्याक्षेपाद्दार्थस्याप्रस्तुतवृत्तांतरूपेणागम
नयानेन रूपेण तस्य समारोपसिद्धेरसमर्थापितत्वे वद्युक्तमिति युक्तमेव प्राचीनानां लक्षणमिति विभावनीयं अलंकारः परिकरः साभिप्रायैर्विशेषणैः सुधांशुकलितो
त्तंसस्तापं हरतु वः शिवः अत्र सुधांशुकलितोत्तंस इति विशेषणं तापहरणसामर्थ्याभिप्रायं यथा वा तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा कु
र्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुधस्य तस्मात्समर्थविशेषणं च साराऽसारायुधत्वाभिप्रायगर्भं
यथा वा सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः शरीरकस्यापि कृते मूढाः पापानि कुर्वते अत्र शरीरविशेषणानि तस्य हेयत्वेनासंरक्षणीयत्वाभिप्रायगर्भाणि य
था वा अध्यास्यं नैकतया स्थितं श्रुतिगणं जन्मी न वह्नीकृतो नाभौ नाभवमच्युतस्य सुमहद्भाष्यं च नाभाषिषि चित्रार्थां न बृहत्कथामचकथं सूत्राग्निना संगुरुर्देव त्वद्गुण

श्रीरामचंद्रजे
१२

द्वर्णेन महं कर्तुं कथं शक्नुयां ॥ अत्र शक्तिगतेन न व्यास्यमित्यादीनि विशेषणानि स्वत्मिन्यासाद्यसाधारणकार्यकरणशक्तिनिषेधपरत्वेन नाहं व्यासः साद्यभिप्रायगर्भा ॥
णि ॥ तत्राद्योदाहरणयोरेकैकं विशेषणं समनंतरोदाहरणयोः प्रत्येकं बहूनि विशेषणानि तत्रापि प्रथमोदाहरणे सर्वाणि विशेषणान्येकाभिप्रायगर्भाणि परार्थरूपाणि
च द्वितीयोदाहरणे भिन्नाभिप्रायगर्भाणि स्वकार्थरूपाणि चेति भेदः ॥ तेषु च परार्थसमावेशः पिनद्धभिन्नव्यपदेशः ॥ नापहरणेमन्मथस्य कैमुतिकन्यायेन सर्वथान्विधेयं नं अ
कत्वे शरीरसंहरणार्थत्वमापमाचरतां मृदुत्वे वर्णनीयराजगुणकथनाशक्तत्वे च वाच्यैकनोपस्कारकत्वात्तदेव व्यंग्यार्थसावाद्यपरिकरत्वात्परिकर इति नामास्यालंकार
स्य ॥ केचित्तु निःप्रयोजनविशेषणोपादानेऽपुष्टार्थदोषस्योक्तत्वात्सप्रयोजनत्वं विशेषणस्य दोषाभावमात्रेण कथ्चिदलंकारः ॥ एकनिष्ठतादृशानेकविशेषणोपन्यासः
परं वैचित्र्यविशेषात्परिकर इत्यलंकारमध्ये परिगणितं त इत्याहुः ॥ वस्तुतस्तु अनेकविशेषणोपन्यास एव परिकर इति न नियमः श्लेषयमकादिषु पुष्टार्थदोषाभावेन
तत्रैकस्यापि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिविशेषसद्भावात्परिकरोपपत्तेः ॥ यथा ॥ अतिथियजेत नित्यं यदि देवतासु नयतमभ्यर्चनेषु च नेत्यघं ॥ इति नते
वसद्देवतकाबयं वनवता न वनात्किमाहि ॥ अत्र उक्तहृतपुरोधक्रान्तेंद्रादीन्प्रति भगवतः कृष्णस्य वाक्ये गोवर्धनगिरिर्वास्माकं रक्षकत्वेन देवतामिति स एव पूजनी
यः नारण्यकः पुरुहूत इत्येवं परं च न च तेन निगोवर्धनगिरेर्विशेषणं काननवता निर्झरादिमत्ताद्युपफलमूलतृणजलादिभिरारण्यकानामस्माकमस्मद्गवानां चग
द्दलंकारत्वमिति बहुवत्रापि स्वधांश्रुकलितोनेसदृशादेन स्यात्मसाभेदेन निवार्यते ॥ अपि च एकपदार्थहेतुककाव्यलिंगमलंकार इति सर्वसम्मतं तदेकस्यापि विशेष
णस्यालंकारत्वं युक्तमेव ॥ साभिप्रायविशेष्यत्वमेव परिकरांकुरः ॥ चतुर्णां पुरुषार्थानां दातादेवश्चतुर्भुजः ॥ अत्र चतुर्भुज इति विशेष्यं युगपत्पुरुषार्थचतुष्टयदानसाम
र्थ्याभिप्रायगर्भं ॥ यथा वा ॥ फणीन्द्रस्तिगुणान्वक्तुं लेखितुं हैहयाधिपः । द्रष्टुमाखण्डलः शक्तः काहमेषां गुणाः ॥ फणीन्द्रसादि विशेष्यपदानि सहस्रमुखत्वाद्यभिप्रायग

वासप्रमेवस्यसन्निधापयन्नैमेवसन्कसमसाविमयविशेष
णविधासमसाविविशेषितविशेषणम् ३

र्लिना नार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः सर्वदो माधवः पायात्स यो गंगामदीधरत् अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना उच्चरद्भूरिकीलालः शुशुभे वाहि
नीपतिः अनेकार्थशब्दविन्यासः श्लेषः स त्रिविधः प्रकृतानेकविषयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च सर्वदेत्यादिना क्रमेणोदाहरणानि तत्र सर्वदो
माधव इत्यत्र स्तुत्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तनं प्रकृतश्लेषः अब्जेनेत्यत्र त्वन्मुखंस्तुत्योरुपमानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृतश्लेषः वाहिनीपतिः से
नापतिः समुद्रश्च तत्र समितौ शस्त्रप्रयातोत्थानद्रुधिरजलयोर्वाहिनीपत्योः प्रकृताप्रकृतयोर्वर्णनमिति प्रकृताप्रकृतश्लेषः यथावा अतः काकोदरो येन द्रोग्धा विक
लात्मना कृतनामा रणख्यातः समेस्तु शरणम्प्रभुः नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः सदृशे वनवृद्धानां कमलानां तवेक्षणे असावुदयमारूढः कांतिमा
न्रक्तमंडलः राजा हरति लोकस्य हृदयं मृदुभिः करैः अत्राद्ये श्लोके स्तुत्यत्वेन प्रकृतयोः रामकृष्णयोः श्लेषः द्वितीये उपमानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः तृतीये
तद्विवर्णनप्रस्तावे प्रकृतस्य चन्द्रस्य द्वितीयस्याप्रकृतस्य नवाभिषिक्तनृपतेश्च श्लेषः यदत्र प्रकृताप्रकृतश्लेषोदाहरणे शब्दशक्तिमूलध्वनिमिच्छन्ति प्राञ्चः तन्मत
ताप्रकृताभिधानमूलकस्य उपमादेरलंकारस्य व्यंग्यत्वाभिप्रायेण न त्वप्रकृतार्थस्यैव व्यंग्यत्वाभिप्रायं अप्रकृतार्थस्यापि शक्त्या प्रतिपाद्यस्याभिधेयत्वावश्यंभावेन
व्यंग्यत्वानपेक्षत्वात् यद्यपि प्रकृतार्थप्रकरणबलात्क्षितितुद्धिस्थेमसेव पश्चान्नृपतिगात्रसधनाद्विवाचिनां राजकरादिपदानामन्योन्यसन्निधानबलात्तद्विषयश्ले
षान्तरोन्मेषपर्यवेकमप्रकृतार्थः स्फुरेत् नैतावतानस्य व्यंग्यत्वं शक्त्या प्रतिपाद्यमाने सर्वथैव वाक्यानपेक्षणस्य सर्वथावसिते प्रकृतार्थाभिधाने पश्चात्स्फुरतिचेत्का
मं गूढश्लेषो भवतु अस्ति नाम तत्रापि गूढश्लेषः यथा अयमतिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाः परिणतदिक्करि
कास्तटीर्बिभर्ति अनलमग्निमक्षरपैमोपलादर्शितस्य यथायुवानवतमः हरयतिमिरंसि षेविरे शेषमोषधिपतेरसन्निधौ अत्रापि समासोक्त्युदाहरणयोः प्राक

नरकहतः
पद्मानांहरिणांच-

श्रीरामचंद्रजे
१३

वधूपक्षे पताकाः सौभाग्यानि विविक्ताः सतीत्व नप विश्राः नमत्रिवलीकाश्च-

कन्वत्रैविमित्यपरंतु त्यार्थत्वात् तत्साधर्म्यनिबंधोऽलिङ् इति न कृतो नश्लेषाक्षेपस्तत्रा … ह

५ तथा च अनुपपत्त्यभावात् तन्मूलत्वाक्षेपो न संभवतीति भावः। कथं तर्हि नदवगमस्तत्राह अर्थसौहृ

रागि केऽर्थे प्रकारणांतरागम इति तु श्लिष्टविशेषणसामर्थ्यादप्रकृतो विप्रकृष्टवेश्यावृत्तांतादिः प्रतीयते तेन च समासोक्तेरंगं श्लेष इति सर्वेषामभिमतं एवं मन्यात्रा

पि श्लेषे गृहे ध्वनिबुद्धिर्न कार्या यथा रम्या इति प्राप्तवतीः पताकाः रागं विविक्ता इति वर्द्धयंतीः यस्यामसेवंत नमद्वलीकाः समं वधूभिर्वलभीर्युवानः अत्र हि तीयां

तादिविशेषणसामर्थ्यान्नारीणां शब्दसामर्थ्यान्नवधूभिरन्वयः विभक्तिभेदात् नच विभक्तिभेदेऽपि तदन्वया हेपकं साधर्म्यमिह निबद्धमस्ति यतः एतस्मि

न्नाधिकपदः श्लिष्टं वहेसस्से सोपवनं भुवाजवेननीताः वाल्मीकेरहितरामलक्ष्मणानां साधर्म्यन्दधति गिरां महासरस्यः इत्यत्रेवाक्षिप्तश्लेषोपवेत् समभि

से न क्रियाविशेषणैः सहार्थत्वेनाप्युपपन्नत्वं वधूशब्दश्लिष्टविशेषणार्थान्वयात् वाग्दानगतीतसौख्यार्थत्वेनालंवत तेन तस्मादर्थसौहृद्यबलादेव तदन्वयानुसंधान

मिति निगूढश्लेषः तदनु तद्बलादेव समशब्दस्य सामर्थ्यात्वकस्मान्नमिति वा उपमेवोपमालंकारस्यांगमयं श्लेषः इति च लक्षितिउपवेन तत्सिद्धं श्लेषत्रैविध्ये

एवं श्लेषः प्रकारांतरेणापि द्विविधः संपन्नः उदाहरणान्तेन अत्र कौलालवाहिनीत्यादिशब्दश्लेषपरस्परावित्तलक्षणपदं गमनपेसनानार्थयोर्ढीकारात्द्भे

गश्लेषः सर्वदो माधवो गंगां हरिणा हितशुक्तिने सादिउपरस्परविलक्षणपदं नंगमयेसनानार्थकोडीकारात्सभंगश्लेष इति तत्र सभंगश्लेषः शब्दालंकारः अभे

गश्लेषस्त्वर्थालंकार इति केचित् उभयमपि शब्दालंकार इत्यन्ये उभयमप्यर्थालंकार इति स्वाभिप्रायः एतद्विवेचनं तु चित्रमीमांसायां द्रष्टव्यं अप्रस्तुतप्र

शंसा स्यात्सा यत्र प्रस्तुतानुश्रया एकः कृती शकुंतेषु योन्यं शक्रान्न याचते अप्रस्तुतवृत्तांतवर्णनेन प्रस्तुतावगतिपर्यवसायितदप्रस्तुत। प्रशंसालंकारः अप्रस्तु

तवृत्तांतवर्णनेन प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतयोः संबंधे सति भवति संबंधश्च सारूप्यं सामान्यविशेषभावः कार्यकारणभावो वा संभवति तत्र सामान्यवि

शेषभावे सामान्यादिविशेषस्य विशेषाद्वा सामान्यस्यावगतौ द्विविधं कार्यकारणभावेऽपि कार्यात् कारणस्य कारणात् कार्यस्यावगतौ द्विविधं सारूप्ये त्वेको भेदस्स।

यवलादिति-

यत इत्यस्य इत्रेवाक्षिप्तश्लेषो भवेत् इत्यनान्वयः

विशेषणानां वधूभिरन्वये च समन्वेतरनुसंधानात् इत्येयतात्पर्यम् इह इति भावः

कुवलयानंद०
१५
15

सा पंचप्रकारा यदाहुः कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति तदन्यस्य वचस्तुल्ये तुल्यस्येति च पंचधेति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणमे
कः कृती सत्राप्रस्तुतस्य चातकस्य प्रशंसा प्रशंसनीयत्वेन प्रस्तुतेन तत्सदृशेन केनापि याचनानभिज्ञेन मानिना पर्यवस्यति यथा वा आबद्धकृत्रिमसटाजटिलांसभि
त्तिरारोपितो मृगपतेः पदवीं यदि श्वा मत्तेभकुंभतटपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य अत्र शुनकस्य निंदा निंदनीयत्वेन प्रस्तुतेन तत्सदृशे
कृत्रिमवेषव्यवहारमात्रेण विद्वत्तामभिनयति वेषे पर्यवस्यति यथा वा अंतश्छिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य मा भूवन्भंगुरा गुणाः
अत्र कमलनालवृत्तांतकीर्तनेन तत्सदृशे बहिःसखले गुणाग्राह्यमान छिद्रान्विते निरंतः कलहे कौधाणोऽरुषे पर्यवस्यति एवं वैलक्ष्ये स्वलवणयोः प्रशंसा ज्ञाद्‌ः कृति
निंदास्वरूपाख्यानसाधारणकीर्तनमात्रप्ररोहाद्भ्युः सामान्यनिबंधना यथा विधाय वैरं सामर्षे नरोऽरौ य उदासते प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतं अत्र
प्रागेव सामर्षे अस्मिन्पाले हन्त्रीणि हरणादिना वैरं दृढीकृतवता रुस्तेन त्वमिन्नुदासितव्यमयुक्तमिति विशेषे वक्तव्ये प्रस्तुते तत्समापनार्थं सामान्यमभिहि
तं यथा वा सौहार्दस्वर्णरेखाणामुच्चावचभिदाजुषां परोक्षमिति कोप्यास्ति परीक्षानिकषोपलः अत्र यदि त्वं प्रसन्नस्य च परोक्षेऽपि ममहितमाचरसि तदा त्वमु
त्तमः सुहृदिति विशेषे वक्तव्ये प्रस्तुते तत्समापनार्थं सामान्यमभिहितं विशेषनिबंधना यथा अंकाधिरोपितमृगश्चंद्रमा मृगलांछनः केसरी निष्ठुरक्षिप्त
मृगयूथो मृगाधिपः अत्र कृत्स्ने प्रतिबलनद्या कोमाईवक्तुव्यपरेप्रस्तावनानुसारेण जरण एव ख्यातिमाप्नोति न तु मृदुरिति सामान्ये वक्तव्येन तत्समापना
र्थं प्रस्तुतो विशेषोऽभिहितः एवं च हतकार्यादिरूपतामामनतः कश्चिदर्थप्रस्तुतस्य निदर्शनार्थमप्रस्तुतकथा विशेषोदाहरणे विषयमेवाप्रस्तुतप्रशंसा स्यात् कार
णनिबंधना यथा, हतसारमिवेंदुमंडलं दमयंतीवदनाय वेधसा कृतमध्यविलं विलोक्यते धृतगंभीरखनीखनीलिम अत्र प्राकरणिकेंदुमंडलगततयो
ध्वनेो गंभीरायां रवसंगर्जेत्विस्याकाशस्यनीलिमायेनेतिमंडलविशेषणं।।

सोऽहं हंसेव स्वर्णे ले रेवेति रूपद्धी

अत्रोदाहरणे प्रस्तुत परस्या प्रस्तुतवर्णनस्य त्रिरूपत्वेस नीत्यर्थः।।

श्रीरामचंद्रमनजे
१५ अप्रस्तुत

कारणेन   सर्वे

ये स्वमाले नरमयंतीव रचननिर्माणार्थं सारांशाहरणेन नूनं कार्यरूपो वर्णनीयतया शक्तो न समर्थतीव दनगतो लोकोत्तरसौंदर्यविशेषः प्रतीयते यथा वा मदीयवरद
राजस्तवे । आख्यिसनूनममृतघृतयः पदं तेदेहं तपोपनतदिव्यपरमानि मुख्याः लावण्यपुण्यनिचयं सुहृदेरिवस्यसेवितमस्यपान्ति मिहिरं प्रतिमासमिन्लाः यत्राया कर
णिकवंरगतेनेयोस्वसमागेन लावण्यपुण्यनिचयविन्यासेन कारणेन नूनं कार्यमनंतकोटिचंद्र लावण्यशालित्वमननम मुखसाधारणं भगवन्मुखे वर्णनीयतया
शक्तं ते प्रतीयते । तथाहि चंद्र लावण्यं चलिंगीषुः द्विजरामाम मनेदेशः पिमेदाख्यवसायाद्यातिमासं भिन्नत्वेन वर्णितस्ते नानीतास्थंशा यनंतकोटयः इति तथैव काल स्या
नादित्वात् सर्वेषां चंद्रेणामाकाशसमाश्रयत्वेन प्रमहिम्ना भगवच्चरणसमाश्रयत्वेन नाथवसितं भगवच्चरणं भपन्नानां च देहे तपोपस्थितोपरमपरामासौ मुखत्वं त
दानीमेव स्वस्य हृद्गोस्वकीयस्य कृतत्वामनिवेशनेन नः तत्संस्थं मंडलस्य शोभिस्त्रसेतत्स्य यंभ्रातिसिद्धमिति तदनुरोधेन नेयं देहे तथकालस्यामावासात्ययोपस्थि
तेस्य सर्वमंडलग्रासैः सा कृपलसमि इंदुगुणत्वेन निरूपितं स्वलावण्यस्य प्रहृतं निमित्तीकृत सततस्य चंद्रमातरणत्वरूपो पचरितत्वमोहादेवेति भगवन्मुखे मस न
गुत्येहितं यद्यपि समुद्रकृत्वेतावत्सोस्तेगुणसंक्रमणं संभवति तथापत्रस्तद्दीसेकवचनेन भगवन्मुखमेव चंद्रस्य समुद्रत्वं न मुखान्तराणि चंद्रसा हस्यगं भ
स्याभावादिति भगवन्मुखस्यैतरमुखेभ्यो व्यतिरेकोपि व्यंजितः नतस्मुतस्मिन्नेव सर्वेषां चंद्राणां स्वस्य यावल्लावण्य विम्नमनो मसेणे नशग्वर्णितः प्रक्तातोर्थः स्य
श्रमेव प्रतीयते यद्यपि स्थितोस्य सर्वमंडलशोभस्य नंतरमावि विरंगौ (नद्यां) नित्कमणनेन रमेवसहस्रनु कृतसंक्रमणांश्चयतेतथापि शारीरकशास्त्रेत स्यार्थस्य वशान्याग भावः स्य
ापितस्य ततिदनुसारेण विन्यस्य मिहिरं यीतात्मकं कार्यनिबंधनायथा नाथत्वदंघि (विक्षो) नखधावनतोयलग्नाः स्तकांतिलेशकणिकाजलबिंदुप्रविशः ताएव तस्य मध्यं।
नेनघनी नवंसो नून्नंसमुद्र (चंद्रपदं) नवनीतपदं प्रपन्नाः अत्र भगवत्पदांबुजस्यालनतोयरूपायां दिव्यसरितिमत्स्यकसंदिवत्सुम्नानां तयासहसमुद्रं प्रविष्टानां नखकां

मीनारूपे

कर्तृकृत
येति पाठः

लुनास्यदानी
ति पाठः

लावण्यरूपपुण्यस्य

भि

प्रयोजनवशात्-पूर्वपादि(पा)त्यागाभावे
चिरादिमर्गप्राप्तिपूर्वकृमस्माहे
रसी भवे न पाठक्रमस्यार्थक्रमेण
बाधादिति भावः ।। स्यापितइति
सोपरायेततेव्याभावात् तथाहन्य
इतिनानीयाधिकरणे सिद्धान्तितस्य
र्थः

कुवलयानंद॰
१५ 15

त्तिलेशकालिकानां परिणामतया संभाव्यमानेन समुद्रनवनीतपदवाच्येन चंद्रेण कार्येण तन्निदानकौस्तुभोत्कर्षः प्रतीयते यथा वा अस्यास्त्वेऽ। इति सौकुमार्यमधुनालंस
र्गदौर्लभ्यसंलापो यदि स्यादुत्तरं परम् तेनैवांचंचद्वयमस्तु वरं अंगानामकठोरता यदि दृषच्छ्रीयेव सा मालती कांतिश्चेत्कमला किमत्र बहुना कार्षाय मालम्बतां अत्र नायि
कागतसादिगुणनीयत्वेन प्रसक्तेषु तल्लेसाधिगतगर्वशांसादिरूपाणेपि विस्येन संभाव्यमानानि कार्याणि क्रमेण निहितानि तेन नायिकेना निजपदवीशासहरणादवन वसत्तका
र्याणि किं तु तन्निर्माणकार्याणि [illegible] ग्नानि रम्याय दिवेत। सिस्मादसंशयं पर्यवतरा जप्रत्ययः तंवेरणपात्रं प्रसमी स्युत्कर्षो वीतप्रियत्वं शिथिलं समर्थ्य इत्याधुनाहर
णान्तरेणैव समरं अंगानामकठोरत्वे तिति नियपादे तु वर्णनीयांगसौकुमार्यमिति शयनिरीक्षणकार्यत्वमपि नार्था चेत्पुं॰ मालती कठोरत्वे विवक्षिते प्रतियोगिविशेष
पेक्षकठोरत्वस्य तत्कार्यत्वान्न किं त्वत्र दूरे व दृष्टमपि स्वदंगमार्दवहेतुर्दशहरणेनैव स्पष्टं अर्थस्य कार्यत्वदर्शनेऽपि कार्यत्वेऽपि कार्येनिबंधनत्वं न हीयत इति ता
दृशामपि कार्यनिबंधनाप्रस्तुतप्रशंसायाम् दाहृतानि प्राचीनैः वस्तुतस्तु तदतिरेकेऽपि न दोषः नह्यप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः पंचविध एव संबंध इति
नियंतुं न शक्यते संबंधांतरेष्वपि तद्दर्शनात् यथा तापत्रयौषधवरस्य तव स्मितस्य निश्वासमंदमरुता वितुषीकृतस्य एते कउं[illegible]स्तवयाऽवविप्रकीर्णा जैवातृक
स्य किरणा जगति भ्रमंति अत्र ह्यप्रस्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपादिव्यौषधधान्यविप्रुड्वक्कडंगरत्वाय तो रत्नेन भगवन्मंदस्मितस्य तत्सारत
रूपः कोऽप्युत्कर्षः प्रतीयते न च धान्यकडंगरत्वयोः कार्यकारणभावादिसंबंधोऽस्ति ततः सतोऽप्यसादिकमपि संबंधांतरमाश्रयणीयं एवमुपमानोपमेयभावम
प्यसकाविकल्पितकार्यकारणभावनिबंधनेऽप्रस्तुतप्रशंसे दर्शिते ततोऽन्यत्रापि द्रष्टव्यते यथा कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि कस्माच्छत्रो
र्मे नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समजनि कुपितः कुंतलक्षोणिपालः १

श्रेष्ठस्य

निरीक्षणकार्यत्वमेव

अप्रस्तुतबुद्धेः कार्यत्वमपि
अपि नाप्रस्तुतबुद्धेः कार
णत्वं प्राकृतमुच्यते

तथा रमणीयं
इष्टमनाप्रस्तुत्कार्यत्वमि
ऐत्यर्थः

श्रीरामचंद्रजी
१५

प्रधानभूतप्रस्तुतांतराभिव्यंजके प्रस्तुतवर्णनेन प्रस्तुतांकुरालंकारः प्रस्तुतस्याभिव्यंजकत्वादंकुरइवांकुर इतिव्युत्पत्तेः किमिति अत्रप्रस्तुतेन भ्रमर त्वं तानेन मयि मनोहारिण्यां सत्यां किमुद्वेगकारिण्या पर
वनितयेति नायकवृत्तांतः प्राधान्येन प्रस्तुतोभिव्यज्यते कथमिह भृंगरवृत्तांतस्य प्रस्तुतत्वं तत्राह इहेति तथा च भृंगसंबोधकत्वात्तद्वृत्तांतोपि प्रस्तुत इति भावः

अत्र किमासां समजनीति मालवीनां तथा रोदनस्य निमित्ते पृष्टे तत्प्रियमरणरूपनिमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति तत्कारणमभिहितमिति कार
णनिबंधना मालवान्प्रति प्रस्थितेन कुंतलेश्वरेण किं ते निर्जिता इति पृष्टे तद्वधानंतरभाविजलसिंचनमेवासां स्मोत्तररूपकार्यमभिहितमित्येव कार्यनिबंधनापि
एवं सा प्रस्तुतप्रशंसा सारूप्यादिति भेदः प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः किं भृंग सत्यां मालत्यां केतक्या कंटकाढ्यया यत्र प्रस्तुतेन वर्ण्यमानेनाभिम
तमप्रस्तुतं द्योत्यते तत्र प्रस्तुतांकुरोऽलंकारः उत्तरार्द्धमुदाहरणं इह प्रियतमेन साकमुद्याने विहरंती कांचिद्भृंगं प्रत्येवाहेति वाच्यार्थस्य प्रस्तुतत्वं नैवानाम
त्रणीयामत्रणेन वाच्यार्थासंभवाद्प्रस्तुतमेव वाच्यमित्सरूपप्रस्तुतावगतये निर्दिष्टमिति वाच्यं मोह्यादिना भृंगादावप्यामंत्रणस्य लोके दर्शनात् यथा कस्
त्वं भो कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते न च्छायापि प
रोपकारकरणी मार्गस्थितस्यापि मे इत्यत्र चेतनाचेतनप्रश्नोत्तरवृत्तिर्ध्यामंत्रणस्यासंभवे संभावितत्वाभावात् एवं प्रस्तुतेन वाच्येन भृंगोपालंभरूपेण प
त्याः कुलवध्वाः सौंदर्याभिमानशालिन्याः कुहूजनपरिवृत्तिः धवायाः परवनितायां विसर्वस्वापहरणसंकल्पः रासदायां वा वेश्यायां कंटकसंकुलकेतकीक
ल्पायां प्रवर्तमानं प्रियतमं प्रत्युपालंभो द्योत्यते यथा वा अन्यासु तावदुपमर्दसहासु भृंग लोलं विनोदय मनः सुमनोलतासु बालामजातरजसं कलिकामका
ले व्यर्थं कदर्थयसि किं नवमालिकायाः अत्राप्युद्याने भ्रमंतं भृंगं प्रत्ययमुपालंभ इति वाच्यार्थस्यापि प्रस्तुतत्वं इहैव प्रौढांगनासु विद्यमानासु बालिकां
रतये क्लेशयति कामिनं प्रति कस्याश्चिद्विदग्धायाः वचनमिति तदुपालंभो द्योत्यते यथा वा कोशद्वंद्वमियं दधाति नलिनी कादंबचंचुक्षतं धत्ते चूतलता
नवं किसलयं पुंस्कोकिलास्वादितं इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेलांतेन तिरोदधे स्तनतटं बिंबाधरं पाणिना अत्र इयमिति नलिनी

नायिकायाः कमलमुकुलाग्रपल्लवव्याजेनैता मदीयस्तनाधरक्षतवृत्तांतं कथयंतीति ज्ञात्वा चेलप्रांतेन स्तनतटं तिरोदधे·

भृंगसंबोधकवाच्यार्थासंभवात्

भूताधारकत्वात् इति भावः वामेनेति मार्गेति च श्लिष्टं

संबोधकत्वायोग्यसंबोधने न

आरोपेणापि

परवनितायां वेश्यायामिति च विषयसप्तमी न द्विषये इत्यर्थः

कुवलयानंदः

१६ तदीयमेवत्री र्थदर्शयति

16

साऽलंकृतिर्ध्वनेः सकाशात् दन्येवेत्यर्थः

उदाहृतकाव्यवाक्ये। एवं चे कदेशेपेक्षे सभावसंबंध निबंधनत्वमत्र दर्शितं

प्रस्तुतत्वप्रख्या

अनेकविशेषनिर्देशेनदीर्घिकायाःस्तरस्मनेनचत्वार्थस्यप्रस्तुतत्वेस्पष्टे प्रस्तुतांतरद्योतनेचत्वयमेवकविना आविष्कृतमुत्तरार्धे अत्राद्योदाहरणयोरन्
परेणध्वनिमार्गलोचनकारः अप्रस्तुतप्रशंसायांवाच्यार्थौःप्रस्तुतत्वाद्वर्णनीयस्त्वेतित्राभिधायामपर्यवसितायांतेनप्रस्तुतार्थव्यक्तिरलंकारः इहतवा
च्यस्यप्रस्तुतत्वेनतत्राभिधायांपर्यवसितायामर्थसौंदर्यबलेनानिमतार्थव्यक्तिर्ध्वनिरेवेति वस्तुतस्तलंकारणवनध्वनिरितिवौवैस्यापितेचित्रमीमांसायां
त्तीयोदाहरणस्यतत्वलंकारत्वेकस्यापिनविवादः उक्तंहिध्वनिकृता शब्दार्थशक्त्याक्षिप्तोःपिव्यंग्योर्थःकविनाद्रुतः यत्राविष्क्रियतेस्वोक्त्यासान्यैवालंकृति
र्ध्वनेरिति एतानिसारूप्यनिबंधनान्युदाहरणानि संबंधांतरनिबंधनान्यपिकथंचिदाद्यांगयोः प्रस्तुतत्वेन नेनोदाहरणीयानीतिदिङ्मात्रमुदाह्रिय
ते रात्रिःशिवाकाचनसन्निधत्तेविलोचनेजागृतमप्रमत्ते समानधर्मायुवयोःसकाशात्सख्यानविघ्नस्तविरेणकश्चित् अत्रशिवसारूप्यमिवनंदेकदेशतया।
नैदृश्यमत्तलोचन[illegible]मपिशिवरात्रिमाहात्म्यप्रयुक्तत्वेनवर्णनीयमितितन्मुखेनप्रस्तुतत्वेशिवसारूप्यगमं यथावा वहंतीसिंदूरंप्रबलकवरीभारतिमिरत्वि
षांवृंदैर्वंदीकृतमिवनवीनार्ककिरणं तनीयस्तेमंनस्तवचदनसौंदर्यलहरीपरीवाहः स्रोतःसरणिरिवसीमंतसरणिः अत्रवर्णनीयत्वेनप्रस्तुतायाःसी
मंतसरणेर्वदनसौंदर्यलहरीपरीवाहस्रोतस्त्वेनपरिकल्पितस्यागवन्परीवाहकारणीभूतस्वच्छस्थानेप्रमोनीवदनसौंदर्यसमृद्धिःप्रतीयतेसापिवर्णनीयत्वेन
प्रस्तुतैव यथावा अंगासक्तिमृणालकांडमयतेभृंगाविशेषांत्यहवेनासामौक्तिकमिंद्रनीलसरणिंप्राप्तानिलाहरते रत्नेयंहिमवालुकापिहृचयोर्धत्तेह्र
दीपकांतमसायःपतितामुवत्करतलेधाराम्बुसंलीयते अत्रनायिकाविरहासहत्वातिशयकस्तापवत्कार्याणिमृणालमालिन्यादीन्यपिवर्णनीयत्वे
नविवक्षितानीतितन्मुखेनसंतापोपगमः यत्रकार्यमुखेनकारणस्यावगतिरपिप्स्तेकेनिवध्नन्तत्रायमलंकारःकिंत्वनुमानमेव यथा परिम्लानंपीनस्त

अन्यस्यापदेशो मिषंयत्र तादृशमित्यर्थः।

प्रस्तुतत्वेपिमुख्यतयाता त्पर्यभावात् अत्राप्यभि धापर्यवसानाभावादिति भावः

शिवरात्रिमाहात्म्यप्रयुक्तत्वे हेतुः तच्चरणेत्ति

कर्ष्टं

श्रीरामचंद्रजने

१६

न जघनसंगात् इमयन्तस्त्वनो मे ध्यसीतः परिमिलनमपापहरितं इदं वाक्यमासंभ्यशुजलतादेपवलनैः कृतांगणाः सेनापवैर्देतिनलिनीपत्रशयनं ननु अनुमापयति
प्रस्तुतकार्याभिधानमुखेन कारणस्य गम्यत्वमपि प्रस्तुतां करविषयश्चेन्न किं तर्हि पर्यायोक्तमिमा कां ज्ञायामाह पर्यायोक्ते तु गम्यस्यैव वाच्यभंग्यन्तराश्रयं
नमस्तस्यैव कृतो येन मुधाराहुवधूकुचौ इत्यत्र गम्यं विवक्षितं तस्यैव भंग्यन्तरेण विवक्षितस्यापि कारणान्तरेण केनचिद्रूपान्तरेणाभिधानं पर्यायोक्तं उत्तरार्धे
मुदाहरणं अत्र नमस्कार्यत्वादेः सर्वसाधारणरूपेण गम्यः राहुवधूकुचवैयर्थ्यकारकत्वेन रूपान्तरेण स एवाभिहितः यथा वा लोकं पश्यति यस्यांघ्रिः स
यस्यांघ्रिर्न पश्यति तामामप्यपरिच्छेद्यविद्याविभ्रमगुरोस्तव अत्र गोनमः पतंजलिश्च सर्वसाधारणरूपान्तरेण गम्यो रूपान्तरेणाभिहितो यथा वा निवेद्यतां
य हन्त समाप्तिं यान्ति शिरीषकोमलाङ्ग्यः इमा निमाने पादाकियद्दूरमिमोऽधुना सेनिधित्सेनेन चक्षुद्द्वयं नेमेते अत्र कियद्दूरं निगमिषति गम्यमेव वाक्यरूपान्तरेण
अभिहितः यथा वा देवं वेदेन सर्वाधिराधिं देवतानां सार्वभौमं यास्मप्रशान्ता भुवनविदिता यस्य वाहाधिवाहाः भस्मापरीभुवनमधरं शुक्लं पुष्पवाटीश्मशानीपालाः
ज्ञातमस्य मुखात्स्वप्नेऽपि नभुमि नोभूः अत्र यस्य वेदा वाहा भुजंगमा भूषणानीत्यादि तत्तद्वार्ता सर्वा वस्थितौ वेदत्वाद्याकारेण गम्या एव वेदादयो याः सर्व
मुखविनेयत्वाद्याकारेणाभिहिताः परं तु देवतासार्वभौमत्वस्फुटीकरणाय विशेषणविशेष्यभावव्यत्यासेन प्रतिपादिताः अलंकारसर्वस्वकृतापि प
र्यायोक्तस्य संप्रदायगतमिदमेव लक्षणमंगीकृतं गम्यस्यापि भंग्यन्तरेणाभिधानं पर्यायोक्तमिति चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूजनस्य आ
लिंगनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषं इति प्राचीनतदुदाहरणं त्वस्य प्राणोज्झितं राहुवधूगतेन विशिष्टेन रतोत्सवेन राहोः शिरश्छेदः कारणरू
पो गम्यत इति एवं च गम्यस्यैवाभिधानमिति लक्षणानुपपत्तिमाशंक्य यदुक्तं तस्यैवाभिधानायोगात्कार्यादिद्वारेणैवाभिधानं लक्षणे विवक्षितमिति त

लक्षणमपि क्लिष्टतया योजितं लोचनकृतापि पर्यायोक्तं यदनेन प्रकारेणाभिधीयत इतीदमेव लक्षणमंगीकृत्य तन्न उदाहरणे चकार्येण शब्दाभिहितेन व्यंग्य
समर्पकप्ररूपेण च लक्षणलक्षनामिच क्लिष्टतया योजितं वा यादृमनेन प्रकारेण व्यंग्येनोपलक्षितं सद्यदभिधीयते तत्पर्यायेण प्रकारान्तरेण व्यंग्येनोपल
क्षितमुक्तमिति सर्वोप्ययं क्लेशः किमर्थमिति न विद्मः दर्शितानि हि गम्यस्यैव रूपान्तरेणाभिधाने वहूदाहरणानि चक्राभिघातप्रसभाज्ञयैवेति प्राचीनोदाह
रणमपि त्वद्रूपेणागम्यस्य भगवतो रूपान्तरेणाभिधानं संगतमात्मक योजनमेव यद्राहुशिरश्छेदावगमनं तत्प्रागुक्तरीत्या प्रकृततोपकरणं प्रकृतेन राहोः शिरोमा
त्रावशेषणेनालिंगनवंध्यत्वाद्यापादनरूपेण भगवतो रूपान्तरेणोपपादितेन भगवद्रूपेणावगमनं पर्यायोक्तस्य विषयः पर्यायोक्तं तु प्राकृत्येवाजेन इष्टसा
धनं यामि त्वत्कृतं तदृष्टिव्रजमामास्थितामिह एव तत्राधिकं नायिकेन संगमस्य शून्यत्वं तद्दर्शनव्याजेन निर्गच्छे साऽस्थानत्वाद्यनुरंसंपादनरूपेष्टसाध
नं पर्यायोक्तं यथा वा देहि मत्कंदुकं राधे परिधाननिगूहितं इति विनिवेश्य नीवींतत्स्याः कृष्णो मुदेस्तु वः एवं च परेष्टसाधनमत्र कंदुकसद्भावशोधनार्थं
नीवीविस्रंसनव्याजेन स्वेष्टसाधनमिति भेदः उक्तिर्व्याजस्तुतिर्निंदास्तुतिर्निंदास्तुतिनिंदयोः कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं साधुदूति
पुनः साधकर्तृत्वं किमतः परं यन्मदर्थैर्विलूनासि दन्तैरपि नखैरपि निंदयास्तुतेः स्तुत्या निंदाया अवगमने व्याजस्तुतिः कः स्वर्धुनीत्युदाहरणे वि
वेको नास्तीति निंदाव्याजेन गंगास्तुति वदेवं महापातकिनोऽपि स्वर्गं नयतीति व्याजरूपया निंदया तत्प्रभावातिशयस्तुतिः साधुदूतीत्युदाहरणे मद
र्थमियत्क्लेशमनुभूतवत्यसीति व्याजरूपया स्तुत्या मदर्थं न गतासि किं तु रन्तुमेव गतासि अधिकृतां दूतिकाधर्मविरुद्धकारिणीमिति निंदावगमने यथा
वा कस्ते शौर्यमदो योद्धुं त्वय्येकं सप्तिमास्थिते सप्तसप्तिसमारूढा भवन्ति परिपन्थिनः अर्हं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतं देवेत्थं जगतीतले

स्मरहरानावेसमुन्मीलति गंगासागरमंबरंशशिकलानागाधिपः क्ष्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत्वां मांतु भिक्षाटनं अत्राद्योदाहरणेसमसमि
प्रगतस्वेषमूलनिंदाव्याजेन स्तुतिर्गम्यते द्वितीयोदाहरणे सर्वज्ञः सर्वेश्वरोऽसीति राज्ञः स्तुत्या व्याजभूतया मदीयवैदुष्यादिदारिद्र्यादि सर्वं जानन्न
पि वक्तव्यानेन रक्षितं त्वया कोऽपि महान् किमपि न ददासीति निंदा व्यज्यते सर्वमिदं निंदास्तुत्योरेकविषयत्वेनोदाहरणं भिन्नविषयत्वेन निंदया स्तुत्य(
भिव्यक्तिर्यथा कस्त्वं वानर रामराजभवने लेखार्थसंवाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलंकापुरः बद्धो राक्षससूनुनेति कपिभिः संताडितस्त
र्जितः सव्रीडात्तपराभवो वनमृगः कुत्रेति न ज्ञायते अत्र हनूमन्निंदयास्येतरवानरस्तुत्यभिव्यक्तिः स्तुत्या निंदाभिव्यक्तिर्यथा यद्वक्त्रं मुहुरीक्षसे न धनि
नां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान्प्रत्याशया धावसि कालेबालतृणानि खादसि परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किन्ना
म तप्तं तपः अत्र हरिणस्तुत्या राजसेवापरिखिन्नस्यात्मनो निंदाभिव्यज्यते अथाप्रस्तुतप्रशंसाविशेषस्यालंकारसर्वस्वकारस्तेन हि सारूप्यनिबंधन
अप्रस्तुतप्रशंसोदाहरणानंतरं वैधर्म्येणापि दृश्यते यथा धन्याः खलु वने वाताः कह्लारस्पर्शशीतलाः राममिंदीवरश्यामं ये स्पृशन्त्यनिवारिताः अत्र व
नेवाताधन्यास्त्वप्रस्तुतार्थादहमधन्य इति वैधर्म्येण प्रस्तुतार्थः प्रतीयते ऽस्मिन्नुसारितं इयमेवाप्रस्तुतप्रशंसा न कार्यकारणादिनिबंधनेति सरणी यदाह (
अप्रस्तुतप्रशंसा स्यादप्रकाण्डे तु या स्तुतिः सुखं जीवन्ति हरिणा वनेष्वपरसेविनः अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः सेयमप्रस्तुतैवात्र मृगवृत्तिः
प्रशस्यते राजानुवर्तनक्लेशनिर्विण्णेन मनस्विनेति वस्तुतस्त्वत्र व्याजस्तुतिरित्येव युक्तं स्तुत्या निंदाभिव्यक्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यविषयविशे
षसद्भावात् अनया प्रसिद्धव्याजस्तुत्युदाहरणे ऽप्रस्तुतानां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे गम्येते इत्येतावता व्याजस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात्

स्तुत्यास्तुतेरप्यगम्यत्वे व्याजस्तुतिरुदाहृता धन्योसि भृंगयस्पैतन्मुखद्युतिचुम्बसि एवं वा नया प्रक्रियया यत्रान्यगतस्तुतिविवक्षयान्यस्य स्तुतिः क्रि
यते न ज्ञापि व्याजस्तुतिरेव अप्रस्तुतव्याजेन तत्प्रस्तुतिरिति स्पष्टार्थानुगमसद्भावात् यथा वा शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्त
पः तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः अत्र शुकशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्गम्यते निंदाया निंदया व्यक्ति
र्व्याजनिंदेति गीयते विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः अत्र हरनिंदया विषमविपाकं संसारं प्रवर्तयतो विधेर्निंदा निर्वर्ण्या व्याजनिंदा यथा वा ।
विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवापराधः सहकारतरौ चकार योसौ सहवासं सरलेन कोकिलेन अत्र स्तुत्याः काकस्य निंद्यव्यक्तिरिति पंचमप्र
कारव्याजस्तुतिप्रतिद्वन्द्वीनेयं व्याजनिंदा ननु यत्राप्रस्तुतस्याप्रस्तुतिरिति निंदया प्रनिंदा च प्रतीयते तत्र व्याजस्तुतिव्याजनिंदालंकाराभ्युपगमे स्तुति।
निंदारूपाप्रस्तुतप्रशंसोदाहरणेषु प्रस्तुतप्रशंसानवकाशा तेषामपि व्याजस्तुतिव्याजनिंदाभ्यां क्रोडीकरणसंभवादिति चेत् उच्यते यत्राप्रस्तुतवृत्तान्ताद
स्तुतिनिंदारूपात्प्रस्तुतवृत्तान्तः प्रतीयते नाम्बुजानि भृंगाः सिकं टकावहहो बहिरिसादौ तत्र लक्ष्यावकाशा सारूप्यनिबंधनाप्रस्तुतप्रशंसा ज्ञापित्र
वर्तमाना न वारयितुं शक्या अत्र स्तुत्या स्तुतिरन्यनिंदया न्यनिंदेत्येवं व्याजस्तुतिव्याजनिंदे अपि संभवतस्त्वत्कामं ते अपि संभवेतां न तु स्याः परिसा
गः यद्यपि विधिरेव विशेषगर्हणीय इति श्लोके विधिनिंदयानन्यलकाकनिंदया वा विशेषणस्य प्रमोतेनैव विदग्धमनसां स्याद्विनस्य पूर्वस्य च निंदापि
प्रतीयते इति सारूप्यनिबंधनाप्रस्तुतप्रशंसाप्यस्ति तथापि सैव व्याजनिंदामूलेति प्रथमोपस्थिता सापि न चाउर्वारा एवं च व्याजनिंदारूपेयमप्रस्तुतप्रशं
सेति चमत्कारातिशयः एवमेव व्याजस्तुतिमूलकव्याजस्तुतिरूपाप्रस्तुतप्रशंसा दृश्यते यथा लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः ।